3 1761 07749083 7

Visvesvata Suri
(Vyakaranasiddhantasudhanidhih)

PK
541
V57
1914
fasc.7

THE

HOWKHAMBÂ SANSKRIT SERIES;

A

OLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO. 251.

व्याकरणसिद्धान्तसुधानिधिः।

पर्वतीयविश्वेश्वरसूरिविरचितः।

लब्धव्याकरणोपाध्यायपदवीकेन काव्यतीर्थविरुदभाजा

सीतारामशास्त्रिणा परिशोधितः।

YÂKARANA SIDDHANTA SUDHÂNIDHI

BY

VÎSVÊSVAR SÛRI,

Edited by

Pandit Sita Rama Sastri Shende

Vyakaranopâdhyaya, Kavyatirtha.

A Scholar of the Benares Sanskrit College.

FASCICULUS VII-[illegible]

UBLISHED & SOLD BY THE SECRETARY,

CHOWKHAMBA SANSKRIT SERIES OFFICE. BENARES.

AGENTS:-OTTO HARRASSOWITZ, LEIPZIG:

PANDITA JYESHTHARAM MUKUNDAJI. BOMBAY:

PROBSTHAIN & CO; BOOKSELLERS, LONDON.

Printed by Jai Krishna Das Gupta,

at the Vidya Vilas Press.

Benares.

Price Rupee one.

541
V57
1914
fasc. 7

॥ श्रीः ॥

—:०:—

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ॥
सुवर्णाऽङ्कितभव्याभशतपत्रपरिष्कृता ॥ १ ॥
चौखम्बा–संस्कृतग्रन्थमाला मञ्जुलदर्शना ॥
रसिकालिकुलं कुर्यादमन्दाऽऽमोदमोहितम् ॥ २ ॥

स्तवकः—२५१

१ अस्यां चौखम्बा– संस्कृतग्रन्थमालायां प्रतिमासं पृष्ठशतके सुन्दरैः सीसकाक्षरैरुत्तमेषु पत्रेषु एकः स्तवको मुद्रयित्वा प्रकाश्यते । एकस्मिन् स्तवके एक एव ग्रन्थो मुद्र्यते ।

२ प्राचीना दुर्लभाश्चामुद्रिता मीमांसावेदान्तादिदर्शनव्याकरणधर्मशास्त्रसाहित्यपुराणादिग्रन्थाः ।

३ एवाऽत्र सुपरिष्कृत्य मुद्र्यन्ते ।
काशिकराजकीयप्रधानसंस्कृतपाठशालाऽध्यापकाः पण्डिता अन्ये च शास्त्रदृश्यो विद्वांस एतत्परिशोधनादिकार्यकारिणो भवन्ति ।

४ भारतवर्षीयैः,ब्रह्मदशीयैः,सिंहलद्वीपवासिभिश्चैतद्ग्राहकैर्देयं वार्षिकमग्रिमं मूल्यम्–मुद्राः ७ आनकाः

५ अन्यैर्देयं प्रतिस्तवकं ... ... " " १ " ०

६ प्रापणव्ययः पृथग् नास्ति । ... ...

साम्प्रतं मुद्र्यमाणा ग्रन्थाः—

(१) संस्काररत्नमाला । गोपीनाथभट्टकृता खण्डे २

(२) शब्दकौस्तुभः । भट्टोजिदीक्षितकृतः १२

(३) श्लोकवार्तिकम् । भट्टकुमारिलविरचितम् पार्थसारथिमिश्रकृतन्यायरत्नाकराख्यया व्याख्यया सहितम् । सम्पूर्णम् । १०

(४) भाष्योपबृंहितं तत्त्वत्रयम् । विशिष्टाद्वैतदर्शनप्रकरणम् । श्रीमल्लोकाचार्यप्रणीतम्। श्रीनारायणतीर्थविरचितभाट्टभाषाप्रकाशसहितं सम्पूर्णम् (वेदान्तः) २

(५) करणप्रकाशः । श्रीब्रह्मदेवविरचितः १

(६) भाट्टचिन्तामणिः । महामहोपाध्यायश्रीगागाभट्टविरचिता । तर्कपादः(मीमांसा) २

(७) न्यायरत्नमाला श्रीपार्थसारथिमिश्रविरचिता सम्पूर्णः (मीमांसा) २

(८) ब्रह्मसूत्रभाष्यम्–बादरायणप्रणीतवेदान्तसूत्रस्य यतीन्द्रश्रीमद्विज्ञानभिक्षुकृतव्याख्यानम् । सम्पूर्ण । (वेदान्तः) ६

(९) स्याद्वादमञ्जरीमल्लिषेणनिर्मिता सम्पूर्णा २

(१०) सिद्धित्रयम्–विशिष्टाद्वैतब्रह्मनिरूपणपरम् श्रीभाष्यकृतां परमगुरुभिः श्री ६ श्रीयामुनमुनिभिर्विरचितम् । सम्पूर्ण(वेदान्तः)१

(११) न्यायमकरन्दः । श्रीमदानन्दबोधभट्टारकाचार्यसंगृहीतः । आचार्यचित्सुखमुनिविरचितव्याख्यापेतः (वेदान्तः) ४

(१२) विभक्त्यर्थनिर्णयो न्यायानुसारिप्रथमादिसप्तविभक्तिविस्तृतविचाररूपः म० म० श्रीगिरिधरोपाध्यायविरचितः सम्पूर्णः (न्यायः) ५

(१३) विधिरसायनम् । श्रीअप्पयदीक्षितकृतम्। सम्पूर्णम् (मीमांसा) २

(१४) न्यायसुधा (तत्त्ववार्तिकटीका) भट्टसोमेश्वरविरचिता । (मीमांसा) १६

कृदन्ततद्धितान्तसमासाः प्रातिपदिकसंज्ञाः । प्रत्ययान्तप्रतिषेधस्य पूर्वमुक्तत्वात्तदपवादस्यास्य प्रत्ययान्त एव प्रवृत्तेः, "संज्ञाविधौ"इत्यस्य नात्र प्रवृत्तिरिति न्यासकारः । लिङ् धुक् इत्यादौ अधातुरिति, कर्तेत्यादौ प्रत्ययान्तमिति पर्युदासे प्राप्तेऽयमारम्भः । समासग्रहणं च नियमार्थमिति व्याख्यातम् ।

ननु समासस्य प्रत्ययान्तत्वादप्राप्तविधिरयं स्यात् । मैवम् । प्रत्ययग्रहणे यस्मात्स विहितस्तदादेरेव ग्रहणात् । न च "स्त्रीप्रत्यये चानुपसर्जनेन" इत्यनुपसर्जनस्त्रीप्रत्यये तदादिनियमाभावाद् 'राजकुमारी'इत्याद्यर्थं स्यादिति वाच्यम् । अन्तरङ्गस्यापि हल्ङ्यादिलोपस्य लुग्विषये प्रवृत्त्यभावात्, श्रूयमाणे एव सुपि समासप्रवृत्तेः, 'परिहृत्यापवादविषयम्' इतिन्यायात् । तत्राप्रत्ययान्तत्वेन समासवाक्ये प्रवृत्तायाः संज्ञाया एकदेशविकृतन्यायेन विभक्तिलुक्यपि सुलभत्वात् । अत एव गोमत्प्रियः इत्यादौ न नुमादयः । लुका लोपे प्रत्ययलक्षणाभावात् ।

ननु तथाऽप्यसमर्थसमासे विध्यर्थं स्यात् । मैवम् । अर्थवदित्यनुवृत्तेः, तस्य चानर्थकत्वात् । न चैवं तत्र संज्ञाऽनापत्तिः । धर्मिग्राहकमानेन तत्सिद्धेः । "अमूर्यलललाटयोः" इत्यनेन ह्यमूर्यशब्दे उपपदे खश् । विभक्त्यन्तं विना च उपोच्चारितपदरूपोपपदत्वानुपपत्तेः ।

स्यादेतत् । शशविषाणादिसमासार्थमयमपूर्वविधिः । तेषामनर्थकत्वात् । ननु शशपदं शशसम्बन्धाभाववत्परम् । तस्याभेदेन विषाणान्वयः । तथा च शशसम्बन्धाभाववदभिन्नं विषाणमित्यर्थवदेव तदिति वाच्यम् । शशविषाणं नास्तीत्यस्यायोग्यत्वापत्तेः ।

अतएव विषाणे शशसम्बन्धाभावनिश्चयदशायां शशविषाणनिर्मितं कार्मुकमिति वाक्यान्न शाब्दधीरित्यभियुक्ताः । अत एव—

एष वन्ध्यासुतो याति खपुष्पकृतशेखरः ।
मृगतृष्णाऽम्भसि स्नातः शशशृङ्गधनुर्द्धरः ॥

इत्यादेरपार्थकत्वमिति क्षीरस्वाम्यादिभिरुक्तम् । अत एव 'सङ्गतिग्रहणाभावाच्छशशृङ्गादिपदानामबोधकता' इति बौद्धाधिकारदीधितावुक्तम् ।

मैवम् । "शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः" इति पातञ्जलसूत्रात् शशविषाणादेरलीकस्यापि शब्दबोध्यत्वात् । अनेन पदेनालीकं बोध्यमिति वृत्तेस्तत्र स्वीकाराच्च । अत एव 'गगनकमलस्यापि शब्दाभासप्रतिपन्नत्वाद्' इति लीलावत्यामुक्तम् ।

अत्यन्तासत्यपि ज्ञानमर्थे शब्दः करोति हि । इति—

खण्डनकारोक्तेश्च ।

वस्तुतस्तु तन्निष्ठात्यन्ताभावप्रतियोगिनि शशपदस्य लक्षणा । ततश्च तदर्थेनार्थवत्त्वात्प्रातिपदिकसंज्ञा । 'शशसम्बन्धविशेषवद्विषाणम्' इतिधीस्तु भ्रमादेव । एतेन शशविषाणं नास्तीत्यपि व्याख्यातम् । शशसम्बन्धविशेषस्यैव तत्र प्रतियोगितावच्छेदकताया भ्रमविषयत्वात् । अत एव 'शशादिप्रत्येकपदार्थव्युत्पन्नस्य शशविषाणादिपदात्तदर्थप्रत्ययप्रसङ्गाद्' इति दीधितावुक्तं विशिष्टस्यार्थवत्त्वं नास्तीत्यभिप्रायात् ।

अयं तु विशेषः—तादृशार्थविशेषशक्तस्य शशविषाणादिसमासस्य कदाचिच्छक्तिभ्रमादन्यथाबोधकत्वमिति ।

प्राञ्चस्तु खपुष्पशशशृङ्गादिशब्दानामभाववचनत्वादर्थवत्त्वम् ।

तथाहि—खे पुष्पं नास्तीति विग्रहे नञर्थान्तर्भावः । विग्रहे

नास्तीति कथनं समासार्थविवरणार्थम् । समासोत्तरं नास्तीति पदजातं त्वनुवादमात्रम् । स्पष्टं चैतन्मीमांसावार्त्तिकादावित्याहुरिति दिक् ।

ह्रस्वो नपुंसके प्रातिपदिकस्य ४७।

अजन्तस्य प्रातिपदिकस्य नपुंसके ह्रस्वः । श्रीपम् । ह्रस्वश्रुत्या "अच" इत्युपस्थितौ तदन्तविधिः । प्रातिपदिकसम्बन्धिनोऽच इत्यन्वये तु वैयधिकरण्यम्, सुवाक् कुलमित्यादावतिव्याप्तिश्च स्यात् ।

न च नपुंसकपदेनैव प्रातिपदिकाक्षेपसम्भवात्तदुपादानवैयर्थ्यम् । काण्डे कुड्ये रमते ब्राह्मणकुलमित्यादिव्यावृत्त्यर्थत्वात् । साधनाश्रयसंख्यावत्तल्लिङ्गस्याप्युपादानसंभवात् ।

नचोक्तन्यायेन 'दोषा ब्राह्मणकुलम्' इत्यादौ सहचरितत्वाद्दोषाशब्दस्यौपचारिकत्वेऽव्ययस्यापि ह्रस्वापत्तिः प्रातिपदिकत्वादिति वाच्यम् । 'दोषा दिवा' इति शब्दौ हि रात्रावहनीति सप्तम्यर्थविशिष्टार्थौ । ब्राह्मणकुलसाधनानां क्रियाणां अधिकरणं कालो भवन् ब्राह्मणकुलस्याधिकरणम्—'दोषा दृश्यते चरत्यधीते वा' इति । आधेयव्यवधानेनाधिकरणस्य क्रियाधारत्वात् । ततश्चाव्ययं नपुंसकस्याधिकरणमेव न तु नपुंसकमिति ।

ननु काण्डीभूतं ब्राह्मणकुलमित्यादौ प्रकृतिविकृत्योरभेदविवक्षायां च्विप्रत्ययान्तस्यापि नपुंसकत्वादतिव्याप्तिरिति । नच कृते ह्रस्वे "च्वौच"इति दीर्घो भविष्यतीति वाच्यम् । अन्तरङ्गे दीर्घे बहिरङ्गस्य ह्रस्वत्वस्यासिद्धत्वात् । एवं रमते इत्यत्रापि ह्रस्वत्वे टेरेत्वं नेति योज्यमिति चेन्न ।

---

१ अधिकरणं भवम् काल इति योजना ।

असत्त्ववाचित्वादव्ययस्य नपुंसकत्वाभावात्। एतेन तिबन्तमपि व्याख्यातम्। शक्त्याश्रयद्रव्यनिष्ठसंख्याप्रतिपादकस्याप्याख्यातस्य तदीयलिङ्गप्रतिपादने सामर्थ्यविरहात्। शब्दशक्तिस्वाभाव्यात्। 'काण्डे तिष्ठतः' इत्यत्रापि नपुंसकत्वाभावः, संख्यायाः प्राधान्यात्। अवयवधर्मेण समुदायस्य नपुंसकत्वव्यपदेशे तु काण्डे कुड्ये इत्यत्र स्यात्। प्रातिपदिकविभक्त्योरेकादेशस्य प्रातिपदिकग्रहणेन ग्रहणात् 'ह्रस्वो नपुंसके यत्तस्य'इति कर्त्तव्यं स्यात्। साक्षात्तस्यैव यदा नपुंसकत्वं तदा ह्रस्वो न त्ववयवद्वारके तस्मिन्निति तदर्थः।

अथवा तस्यैवानुपजातव्यतिरेकस्येत्यर्थः। विभक्त्यन्तं चोपजातव्यतिरेकमिति नातिप्रसङ्गः।

सूत्रकारस्य त्वयमभिप्रायः—मुख्यमेवात्र नपुंसकवृत्ति प्रातिपदिकं गृह्यते। अन्तवद्भावातिदेशात्तु प्रातिपदिकत्वं न मुख्यमिति। युगवरत्राय,युगवरत्रार्थम्, युगवरत्रेभ्य इत्यादौ तु न ह्रस्वः। बहिरङ्गत्वाद्दीर्घादीनामसिद्धत्वात्। एवमतिखट्वायेत्यादौ उत्तरसूत्रेण ह्रस्वोऽपि नेति व्याख्येयम्।

गोस्त्रियोरुपसर्जनस्य ४८।

उपसर्जनेति गोस्त्रियोः,तेच प्रातिपदिकस्य विशेषणम्। तेन तदन्तविधिः। "ग्रहणवता प्रातिपदिकेन"इति निषेधस्य प्रत्ययविधिमात्रविषयकत्वात्। तथा चोपसर्जनभूते ये गोस्त्रियौ तदन्तं यत्प्रातिपदिकं तस्य ह्रस्वः स्यात्। "अलोऽन्त्यस्य"। निष्कौशाम्बिः, अतिखट्वः। "एकविभक्ति च" इत्युपसर्जनत्वम्। चित्रगुः। प्रथमानिर्दिष्टत्वात्।

स्यादेतत् । अतिश्रीः, अतिलक्ष्मीरित्यादौ ह्रस्वत्वं स्यात् । मैवम् ।

अत्र वार्त्तिकम्—

"गोटाङ्ङहणं कृन्निवृत्त्यर्थम्" ।

कृत्स्त्रीणां धातुस्त्रीणां चेत्यर्थः । टाङिति टापमारभ्य ष्यङो ङकारेण प्रत्याहारः । तथा च कृदन्तस्त्रीणां तद्ग्रहिर्भावान्न दोषः ।

भाष्यकारास्त्वाहुः—स्त्रीग्रहणं स्वरितमाश्रित्य "स्त्रियाम्" इत्यधिकारे विहिता एव प्रत्यया गृह्यन्ते । "स्वरितेनाधिकारः" इति सूत्रस्य यत्र स्वरितत्वं तत्र तदधिकारोपादानमिति, अस्यापि व्याख्यास्यमानत्वात् ।

नन्वेवं राजकुमारीमतिक्रान्तोऽतिराजकुमारीरित्यादौ ह्रस्वो न स्यात् । प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्यैव ग्रहात् । कुमारशब्दस्य ङीप्रकृतित्वात्कुमारीशब्दस्यैव स्त्रीप्रत्ययान्तत्वान्न तु राजकुमारीशब्दस्येति चेन्न । स्त्रीप्रत्यये तदादिनियमाभावात् । अत एव परमकारीषगन्धीपुत्र इत्यत्र "ष्यङः संप्रसारणम्" इत्यस्य प्रवृत्तिः ।

ननूपसर्जनस्त्रीप्रत्यये तदादिनियमोऽस्त्येव अन्यथाऽतिकारीषगन्ध्यापुत्र इत्यत्रापि सम्प्रसारणापत्तेः ।

अत्र कैयटः—'क्वचिदुपसर्जनस्त्रीप्रत्ययेऽपि तदादिनियमो नास्ति हलङ्यादिसूत्रे दीर्घग्रहणात् । अन्यथा निष्कौशाम्बिः, अतिखट्व इत्यादौ उपसर्जनत्वात् ङ्यावन्ताभावादेव सुलोपानापत्त्या तद्वैयर्थ्यापत्तेः ।

नन्वेवं कुम्भकारीशब्दादपि स्त्रीभ्यो ढगुत्पत्त्या कौम्भकारेयसिद्धौ "अनुपसर्जनाद्"इत्यत्र तत्सिद्धिर्न स्यादिति भाष्यविरोध इति चेन्न । तत्र तदादिनियमाभावे कदाचित् कारी-

शब्दादपि तदापत्तेरिति तदाशयादिति ।

न्यासकारस्त्वाह–'अङ्गसंज्ञासूत्रे योगविभागलभ्येयं परिभाषा । तत्र "वाऽऽमि"इत्यत्राव्यवस्थितविभाषार्थस्य वाशब्दस्यानुवृत्तिमाश्रित्यात्र तत्प्रवृत्तिर्नेति व्याख्येयम् ।

यद्वा"कृत्तद्धित"इत्यतोऽनुक्तसमुच्चयार्थश्चकारोऽनुवर्त्यः,इति ।

स्यादेतत् । गोकुलमित्यादावतिप्रसङ्गः । कुमारीपुत्र इत्यत्र कुमारीशब्दस्य प्रत्ययान्तत्वादप्रातिपदिकत्वेऽपि राजकुमारीशब्दस्य समासप्रातिपदिकत्वाद्राजकुमारीपुत्र इत्यत्रापि अतिप्रसङ्ग एव । खट्वायादो मालायाद इत्यादौ तु न तच्छङ्का, उभयत आश्रयेऽन्तादिवद्भावनिषेधात् । अत्र हि प्रातिपदिकं स्त्रीप्रत्ययश्चाश्रीयते–स्त्रीप्रत्ययान्तं यत्प्रातिपदिकमिति । एकादेशश्च यदि प्रातिपदिकस्यान्तवत्तदा स्त्रीप्रत्ययस्यान्तत्वं नास्ति, अथ स्त्रीप्रत्ययस्यादिवत्तदा प्रातिपदिकत्वं नास्तीति ।

मैवम् । गोकुलमित्यादौ तदन्तत्वाभावात् प्रातिपदिकेच व्यपदेशिवद्भावस्य निषेधात् ।

ननु "येन विधिः"इति सूत्रे "रोण्या अण्""तस्य च"इति वार्त्तिककृतोक्तत्वात् "स्वं रूपम्" इत्यस्यानुवृत्तिरिति लभ्यते । तथा च गोऽन्तत्वाभावेऽपि गोशब्दस्वरूपसत्त्वादेव गोकुलमित्यादौ ह्रस्वः स्यात् ।

मैवम् । "स्वं रूपम्" इत्यस्याननुवृत्तेः । आद्यन्तवत्सूत्रे "येन विधिस्तदन्तत्वे प्रयोजनम्"इति वार्त्तिकोक्तेः ।

न च तथापि "तस्य च"इति वार्त्तिकादेव गोकुलमित्यत्र ह्रस्वापत्तिः । तस्य वार्त्तिकमात्रशेषत्वात् ।

नापि द्वितीयः । उपसर्जनं यः स्त्रीप्रत्ययस्तदन्तस्योपसर्जनस्येत्युक्त्वा यत्प्रतियोगिकं यस्योपसर्जनत्वं त-

त्प्रतियोगिकस्यैवान्तत्वस्य लाभात् । राजकुमारीशब्दस्य तु पुत्रपदेन यः षष्ठीसमासस्तन्निरूपितोपसर्जनत्वसत्त्वेऽपि तन्निरूपितान्त्यत्वाभावात् । अन्यथा "पूर्वपदप्रतिषेधः" इति वार्त्तिकारम्भेऽप्यनिर्वाहात् । पञ्च कुमार्यः प्रिया अस्येति त्रिपदे बहुव्रीहावाद्यपदद्वयस्य "तद्धितार्थोत्तरपद"इति द्विगुसमासे कुमारीशब्दस्य पूर्वपदत्वाभावात् ह्रस्वापत्तेः । भिन्नप्रतियोगिकयोरन्तत्वोपसर्जनत्वयोः सत्त्वात् । एतेन अगोपुत्र इत्यपि व्याख्यातम् ।

अथ तथाऽपि द्वन्द्वस्य प्रतिषेधो वक्तव्यः । कुक्कुटमयूर्यावित्यत्र समासार्थेऽवयवार्थस्योपसर्जनत्वाद्,"अनेकम्"इत्यनुवृत्त्या प्रथमानिर्दिष्टत्वाच्च मयूरीशब्दस्योपसर्जनत्वात्तस्मिन्नेव समासे ऽन्त्यत्वाच्च ।

मैवम् । "परवल्लिङ्गम्" इति "शब्दशब्दार्थौ" इति वक्ष्यमाणत्वाल्लिङ्गतदर्थबोधकप्रत्ययोभयातिदेशस्वीकारान्मयूरीशब्दस्योक्तरीत्या ह्रस्वत्वेऽपि द्वन्द्वसमासोत्तरं ङीप्प्रत्ययोपपत्तेः । अवयवार्थयोरेव परस्परसन्निहितयोर्द्वन्द्वार्थत्वमिति प्राधान्यादुपसर्जनत्वाभावाच्च ।

स्यादेतत् । "कपि प्रतिषेधो वक्तव्यः" । बहुकुमारीकः । विषयसप्तमी चेयम् । कपः पूर्वमेवान्तरङ्गत्वात् ह्रस्वप्रवृत्तिप्रसङ्गात् । न च "न कपि" इति प्रतिषेधः । "केऽण" इति प्राप्तेरेव तेन प्रतिषेधाद् । "अनन्तरस्य" इति न्यायात् । अन्यथा प्रियं ग्रामणि यस्य प्रियग्रामणिक इत्यादेरपि निषेधापत्तेः । कुलादिविशेषणत्वाद्ग्रामणिशब्दे क्लीवत्वम् ।

मैवम् । कपः समासान्तावयवत्वात्कपि कृते स्त्रीप्रत्ययान्तस्य समासप्रातिपदिकत्वाविरहात् । बहुयवागूक इत्यादौ

अतिमाल इत्यादौ च द्वयोः सावकाशतया परत्वात्कप एव प्रवृत्तेः। न चोपसर्जनस्त्रीप्रत्ययान्तप्रातिपदिकमात्रापेक्षं ह्रस्वत्वमन्तरङ्गं कप्तु समासविशेषस्य नञुत्तरपदबहुव्रीहेः सापेक्षत्वाद्बहिरङ्ग इति वाच्यम्। समासार्थोत्तरपदान्ताः समासान्ता इति पक्षे कपोऽवयवापेक्षत्वात्, ह्रस्वस्य च समुदायापेक्षत्वाद् सर्वेभ्यः समासकार्येभ्यः कपोऽन्तरङ्गत्वात्।

तस्माद् "ईयसो बहुव्रीहेः पुंवद्वचनम्" इत्येव वार्त्तिकमारभ्यम्। बह्व्यः श्रेयस्योऽस्य बहुश्रेयसी। "ईयसश्च" इति कप्प्रतिषेधः। बहुव्रीहेः किम्। श्रेयसीमतिक्रान्तोऽतिश्रेयसिरिति तत्पुरुषे ह्रस्वो यथा स्यात्।

लुक् तद्धितलुकि ४९।

स्त्रीप्रत्ययस्य लुक् तद्धितलुकि सति। अभावरूपस्य लुकः परत्वासम्भवात्। पञ्चेन्द्राण्यो देवता अस्य पञ्चेन्द्रः। "तद्धितार्थ" इति समासः। ततः "साऽस्य देवता" इत्यण्। तस्य "द्विगोर्लुगनपत्ये" इति लुक्। "इन्द्रवरुण–" इत्यादिना विहितस्य ङीपोऽनेन लुक्। सन्नियोगशिष्टन्यायेन आनुकोऽपि निवृत्तिः। पञ्चभिः शष्कुलीभिः क्रीतः पञ्चशष्कुलः। "तेन क्रीतम्" इत्यार्हीयस्य ठकः"अध्यर्द्धपूर्व–"इति लुक्। आमलक्याः फलं आमलकम्। "नित्यं वृद्धशरादिभ्य" इति मयट्। फले लुक्। एवं बदरं कुवलमिति। शष्कुल्यादयो गौरादिङीषन्ताः। लौकिकं चैषामुपसर्जनत्वम्। व्याश्रिन्यायादुभयविधस्याप्यत्र ग्रहणात्। लुकि किम्। गार्गीकुलम्। गार्ग्यशब्दाद् "यञश्च" इति ङीप् "यस्येति च" इत्यकारलोपे "हलस्तद्धितस्य"इति यकारलोपः।

स्यादेतत् । अवन्तेरपत्यं गोत्रं स्त्री अवन्ती । "वृद्धेत्कोसलाजादाद्" इति ञ्यङ्कुन्तीत्यप्येवम् । कुरोरपत्यं स्त्री कुरूः । "कुरुनादिभ्यो ण्यः" । "स्त्रियामवन्तिकुन्तिकुरुभ्यश्च" इति लुक् । आद्याभ्याम् "इतो मनुष्यजातेः" इति ङीष् । अन्त्याद् "ऊङुतः" इत्यूङ् । अत्रावन्त्यादीनामुपसर्जनस्त्रीप्रत्ययसत्त्वात्तद्धितलुकश्च कृतत्वात्स्त्रीप्रत्ययस्य लुक् स्यात् ।

मैवम् । यत्र स्त्रीप्रत्ययान्तात्परस्य तद्धितस्य लुक् तत्रैवास्य लुकः प्रवृत्तेः । अत्र च कृते लुकि स्त्रीप्रत्ययोत्पत्तेः । तदुक्तम्—"अलुक्परत्वाद्" इति । उक्तोऽर्थः । बुद्धिपरिकल्पितं लुकः परत्वमाश्रित्य तु वार्त्तिककृतैवमुक्तम् ।

भाष्यकृतस्तु उपसर्जनत्वाभावादेव न दोषः । उपसर्जनेन स्त्रीप्रत्ययस्य विशेषणात्, शास्त्रीयस्योपसर्जनस्यासम्भवाद् अप्रधानरूपोपसर्जनत्वस्याश्रयणात् । अवन्तीत्यादौ चापत्यलक्षणाया जातेः प्राधान्येनाभिधानात्, अप्रातिपदिकत्वाच्च न ह्रस्वत्वम् । आमलकमित्यादौ तु तद्धितान्तत्वात्प्रातिपदिकत्वम् लिङ्गविशिष्टस्यैवोपादानान्न लिङ्गविशिष्टपरिभाषाप्रवृत्तिः । कुरूरित्यत्राप्युभयत आश्रयणेऽन्तवद्भावनिषेधात् ।

इद्गोण्याः ५० ।

तद्धितलुकि गोणीशब्दस्योक्तविषये इत्वं स्यात् । पञ्चभिर्गोणीभिः क्रीतः पञ्चगोणिः । "तद्धितार्थ–" इति समासे क्रीतार्थे ठक् । पूर्ववत् तस्य लुक् । लुकि प्राप्ते ह्रस्वारम्भः । अत्र वार्त्तिकम्–

"इद्गोण्या नेति वक्तव्यं ह्रस्वता हि विधीयते ।
इति वा वचने तावन्मात्रार्थं वा कृतं भवेत् ॥
गोण्या इत्वं प्रकरणात् सूच्याद्यर्थमथापि वा ।"

अस्यार्थः–ननु गोण्या लुङ्निषेध एव कर्त्तव्यो न त्विस्त्वम्, "गौस्त्रियोः" इति ह्रस्वेन सिद्धेः। मैवम्। नेत्युक्ते इदित्युक्ते वा विशेषाभावात्। यदा गोणिपात्रमिदं गोणिरिति मात्रप्रत्ययस्य लोपः क्रियते,तदा लुकि निषिद्धे ह्रस्वत्वं सिद्धम्।तस्मात्प्रथमाविधाने परिमाणग्रहणस्य प्रयोजनं तद्धितं विनाऽपि यत्र परिमाणशब्दाः परिमेये वर्त्तन्ते तदाऽपि प्रथमा यथा स्यादिति। एवं चानुपसर्जनत्वादभेदोपचारेण प्रमेयवृत्तित्वादप्राप्ते ह्रस्वे इत्त्वविधिः। नन्वेवं सर्वत्र गोण्या इत्त्वं स्यात्। तर्ह्युपसर्जनस्येत्यनुवर्त्तते एव नतु तद्धितलुकीति, तेन यत्र स्वार्थोपसर्जनमर्थान्तरं प्रत्याय्यते तत्रेदमित्त्वं विधीयते। नहि तत्र ह्रस्वेन सिद्धिः। अप्रातिपदिकत्वेन तदप्रवृत्तेः। प्रकारान्तरेण प्रत्याचष्टे–गोण्या इत्त्वमिति। अशिष्यमिति शेषः। प्रकरणादिति। गोण्या इत्येव सूत्रणीयम्। न च संनिधानाल्लुकोऽनुवृत्तिप्रसङ्गः। वैयर्थ्यप्रसङ्गात्। तेनैव सिद्धेः। तथा च ह्रस्वानुवृत्तौ लुकोऽपवादो ह्रस्वत्वं विधीयतेइति सिद्धमिष्टम्।सिद्धान्तमाह–सूच्यादीति। यद्यपि गोणिरिति मात्रलोपेनापि सिद्धम्, तथापि इदिति योगविभागार्थमिदम्। तेन पञ्चसूचिरित्यादि सिद्धम्। न चान्यत्राप्यापत्तिः। तस्येष्टमात्रसिद्ध्यर्थत्वात्। तपरत्वं तु दीर्घनिवृत्त्यर्थम्। न च दीर्घस्य दीर्घविधानर्थक्यम्। ह्रस्वलुग्बाधार्थत्वेनोपपत्तेः। न च भाव्यमानत्वादेव दीर्घनिवृत्तिः। लुको ह्रस्वस्य बाधनेन स्वरूपावस्थापनमात्रफलकतयाऽपूर्वविधायकत्वाभावात्।

लुपि युक्तवद्व्यक्तिवचने ५१।

लुपि सति प्रकृतिवल्लिङ्गवचने स्तः। अनेन प्रकृत्यर्थसम्बन्धिन्यौ लिङ्गसंख्ये प्रत्ययार्थेऽतिदिश्येते।युक्तपदस्य प्रकृतिपरत्वात्।

प्रकृतिप्रत्ययार्थयोः परस्परं युक्तत्वेऽपि प्रत्ययार्थे प्रत्ययार्थातिदेशवैयर्थ्यात् । पञ्चालानां निवासो जनपदः पञ्चालाः । कुरवः, अङ्गाः, वङ्गाः, कलिङ्गाः । "जनपदे लुप्" इति लुप् । कुरुशब्देष्यस्य, अन्यत्राण इति विशेषः । पूर्वाचार्यवचनं चैतत् । अग्रे प्रत्याख्यास्यमानत्वात् । व्यक्तिवचने इति किम् । शिरीषाणामदूरभवो ग्रामः शिरीषाः । "अदूरभवश्च" इत्यण् । तस्य च "वरणादिभ्यश्च" इति लुप् । तेषां वनं शिरीषवनम् इत्यत्र णत्वं मा भूत् अन्यथा व्यक्तिसंख्ययोरिव प्रकृतिवृत्तेर्वनस्पतित्वस्याप्यतिदेशापत्त्या "विभाषौषधिवनस्पतिभ्यः" इति णत्वं स्यात् । तदप्रवृत्तौ तु ग्रामार्थकत्वान्न णत्वम् । 'फली वनस्पतिर्ज्ञेयः' इति भेदस्य णत्वविधावनाश्रयणात् । एवं कटुबदर्यां अदूरभवो ग्रामः कटुबदरीत्यादि ।

स्यादेतत् । प्रकृतिगतस्य ग्रामापेक्षव्यतिरेकस्याप्यतिदेशात्षष्ठ्यपि स्यात्, वचनशब्दस्यैकवचनादिप्रत्ययवाचकत्वात् । एकवचनादिसंज्ञविधिकालेऽनुनिष्पादिवचनशब्दस्यापि पारिभाषिकत्वानपायात् । वाक्ये च षष्ठीदर्शनात् । न च वचनशब्देन संख्यैवातिदिश्यते इति वाच्यम् । तद्वाचकशब्दातिदेशपर्यवसाने षष्ठ्या अपि संख्याप्रतिपादकत्वेन तदापत्तेः ।

मैवम् । शिरीषाणां ग्रामस्य च यः सम्बन्धो वाक्ये भासते लुपि कृते तस्य विशिष्टस्यैव प्रातिपदिकार्थेऽन्तर्भावात्, मासजात इत्यादिवत् ।

अत्र भाष्यम्—

"प्रागपि वृत्तेर्युक्तं वृत्तं चागीह यावता युक्तम् ।
वक्तुश्च कामचारः प्राग्वृत्तेर्लिङ्गसंख्ये ये" ॥

अस्यार्थः—वृत्तेः प्राग्वाक्यावस्थामपि प्रकृतिवाच्यं वस्तु प्रत्ययार्थेन संबद्धं वृत्त्यनन्तरमपि तथैव, उभयत्राप्यर्थभेदाभावा-

त्। वक्तुश्चेति चकारस्य भिन्नक्रमत्वात्प्राग्वृत्तेश्चेति योज्यम्। प्राग्वृत्तेर्ये लिङ्गसंख्ये चशब्दाद्वृत्तस्यापि ते अतिदेष्टुं कामचारः। तथा च प्राग्वृत्तेर्ये लिङ्गसंख्ये तयोर्नातिदेशः किन्तु प्रत्यासत्त्या वृत्तस्य ये लिङ्गसंख्ये तयोरेव। ततश्च यथा तावकीनो मामकीन इत्यादौ आदेशबलादुपसर्जनस्यापि संख्याविशेषावगतिः, यथा वा आदेशे प्रथमासामानाधिकरण्यदर्शनाल्लुटि तदवगतिस्तथाऽत्रापि प्रत्ययार्थेऽतिदिष्टसंख्याऽवगमात् तत्प्रकृत्यर्थेऽपि तदवगमः। तत्र वृत्तावुपसर्जनं प्रधानार्थमभिधत्ते इति व्यतिरेकाभावात् संख्यामात्रप्रत्ययार्थे प्रातिपदिकार्थमात्रे प्रथमैव भवति। शिरीषाणां मनुष्या इत्यादौ तु मनुष्यादिजनितव्यतिरेकापेक्षा षष्ठी। शिरीषग्रामयोर्यः सम्बन्धस्तस्यैव वृत्तावन्तर्भावात्। "अथवा प्राग्वृत्तेर्ये लिङ्गसंख्ये ते अतिदिश्येते। षष्ठी कस्मान्न भवति। सामान्यातिदेशे विशेषानातिदेशः" इति भाष्ये पाठान्तरम्। तत्र वाक्यावस्थायां प्रकृत्यर्थस्य ये लिङ्गसंख्ये ते अतिदिश्येते। षष्ठी तु व्यतिरेकनिबन्धना। न चेह प्रत्ययार्थस्य व्यतिरेकोऽस्ति। न च व्यतिरेकसहिता संख्याऽतिदिश्यते, संख्यामात्रातिदेशे सम्बन्धसहितसंख्याऽतिदेशाभावादित्यर्थ इति कैयटः।

अत्र वार्त्तिकम्—"समास उत्तरपदस्य बहुवचनस्य लुपः"। वर्त्तिपदार्थानामेवापेक्षितपरस्पराणां द्वन्द्वार्थमिदम्। उत्तरपदे यत्र बहुवचनस्य लुप् तत्रैव बहुवचनातिदेशो न तु पूर्वपदेऽपीति। मथुरापञ्चालाः। नेह पञ्चालमथुरे। एवं मथुरागोदा इति। न तु मथुरागोदौ। द्वन्द्वेऽपि गोदार्थस्य द्वित्वानतिक्रमादिति कैयटः।

विशेषणानां चाजातेः ५२।

लुबर्थस्य विशेषणानामपि तद्वदेव लिङ्गवचने स्तो न तु जा-

तेः । पञ्चाला रमणीयाः । गोदौ रमणीयौ । गोदौ ह्रदविशेषौ । विशेषणानां विशेष्यसमानयोगक्षेमत्वात्सिद्धेऽपि जातिप्रतिषेधार्थमारम्भः । पञ्चाला जनपदः।गोदौ ग्रामः । जनपदग्रामशब्दौ जातिवचनौ । एवं तद्विशेषणेऽपि गोदौ ग्रामो रमणीयो वह्वन्न इत्यादि । अत्र हि सामानाधिकरण्येनान्वये जातिभिन्नानां विशेषणानां युक्तवद्व्यक्तिवचने, जातिरूपस्य तु विशेषणस्य नेत्यर्थः । वैयधिकरण्येनान्वये तु जातेर्यानि विशेषणानि तेषां नेति । भवतिना नञ्सम्बन्धादसमर्थसमासश्चायम् । आद्ये पञ्चाला जनपद इति सिद्धम् । सुभिक्षः संपन्नपानीयो बहुमाल्यफल इति तद्विशेषणानां तु बहुवचनान्तत्वं स्यात् । अन्त्ये वैपरीत्येन योज्यम् । तस्मात्सूत्रे आजातेरिति आङ् प्रश्लेष्यः तथा च यावज्जा । नियतलिङ्गवचना एव तेषां संज्ञाः। आपो दारा वर्षाः सिकता इत्यादिवत् । तेषां तत्तज्जात्यवच्छिन्नैकव्यक्तिमात्रेऽपि बहुवचनान्तानामेव प्रवृत्तेः ।

लुब्योगाप्रख्यानात् ५४ ।

लुबपि न विधेयो योगस्य यौगिकार्थस्याप्रख्यानात् अनवगम्यमानत्वात् इत्यर्थः । पञ्चाला इत्यादिभ्यो देशविशेषबोधस्य पञ्चालत्वादिप्रकारकस्यैव जायमानत्वात् । क्षत्रियविशेषसम्बन्धित्वेन बोधस्यानुभवसिद्धत्वाभावात् ।

ननु "हस्ताज्जातौ" "कम्बलाच्च संज्ञायाम्" इत्यादौ संज्ञाशब्दानामपि व्युत्पादनमस्त्येव, हस्तीत्यादिभ्योऽपि जातिविशेष-

---

१ अत्रायं ग्रन्थस्त्रुटित उपलभ्यते आदर्शभूतेषु त्रिष्वपि पुस्तकेषु । नियतेत्यादिच "तदशिष्यम्" इति सूत्रव्याख्यानमुदाहरणतः, कौस्तुभात् , प्रदीपाच्चावसीयते ।

प्रकारकस्यैव बोधस्योदयात् । सत्यम् । तत्र तद्धितोत्पत्त्या रूपे विशेषात् । अत्र तु लुप आवश्यकतया तदभावादिति न्यासकृत् ।

योगप्रमाणे च तदभावे दर्शनं स्यात् ५५ ।

चशब्दो हेत्वर्थः । योगस्य प्रमाणं योगप्रमाणम् । यौगिकार्थ-प्रत्यायकत्वमिति यावत् । यदि हि पञ्चालादयः शब्दाः क्षत्रि-यादिसम्बन्धं प्रवृत्तिनिमित्तमभिधायैव जनपदादौ प्रवर्त्तेरन् तदा तदभावे योगाभावे पञ्चालशब्दानामदर्शनमप्रयोगः स्यात् । दण्डसम्बन्धाभावे पुरुषे दाण्डिपदाप्रयोगात् । नचेष्टापत्तिः । प्रयोगविरोधात् ।

प्रधानप्रत्ययार्थवचनमर्थ-स्यान्यप्रमाणत्वात् ५६ ।

वचनमित्यनन्तरं अशिष्यमित्यनुषङ्गः । प्रधानं प्रकृत्यर्थनिष्ठ-प्रकारतानिरूपितविशेष्यत्वरूपेण प्राधान्येन प्रतीपाद्यः प्रत्ययार्थो यत्र तत् । प्रत्ययार्थः प्रधानमित्येवं रूपं वचनमिति यावत् । अशिष्यमनारभ्यं अर्थस्य विशेषणविशेष्यभावरूपस्य अन्य-प्रमाणत्वात् लोकानुभवमूलकत्वात् ।

तेन हि प्रत्ययार्थत्वावच्छेदेन प्राधान्यं बोध्यते उत त-त्सामानाधिकरण्यमात्रेण ।

नाद्यः । घटमित्यादौ कर्मत्वादौ प्रातिपदिकार्थस्य प्रकारत्वे-ऽपि संख्याऽऽदेः प्रत्ययार्थस्य प्रातिपदिकार्थे प्रकारत्वात् ।

नान्त्यः । प्रकृत्यर्थस्यापि क्वचित्प्रधानतया प्रत्ययार्थेऽपि तद्वचनस्यानुपपन्नत्वात् । तथा च क्रमेण लोकविरुद्धार्थबोधकत्वादिति लोकसिद्धार्थबोधकत्वादिति च हेतुद्वये तात्पर्यम् ।

कालोपसर्जने च तुल्यम् ५७।

अतीतायां रात्रेः पश्चिमार्द्धेनागामिन्याः पूर्वार्द्धेन च सहितो दिवसोऽद्यतनः, विशेषणमुपसर्जनमित्यादि पूर्वाचार्याणां वचनम्। तत्राप्याशिष्यत्वं समानं लोकसिद्धत्वात् ।

यद्वा लोकसिद्धत्वाख्यो हेतुस्तुल्यः । तथा चाशिष्यत्वासिद्धिरिति योज्यम् ।

जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम् ५८ ।

स्पष्टोऽर्थः । यद्यपि जातिरुपलक्षणं व्यक्तिस्तु पदार्थ इति पक्षे बहुष्वेकवचनमित्येव युक्तम्, "जातेरुपलक्षणत्वेनाख्यायाम्"इति व्याख्यानात्, तथाऽपि जातौ पदार्थ एतत् । तदुक्तम्–"जात्याख्यायां सामान्याभिधानादैकार्थ्यम्" इति । भाष्ये तु "यद् गार्ग्ये गार्ग्यत्वं तदेकम्"इत्यप्युक्तं तद् गोत्रस्य परिभाषिकजातित्वाभ्युपगमात्, बहुषु गर्गेषु गार्ग्यत्वस्यैकस्य भावादिति कैयटः । जातिश्चेह समानकालीनानेकवृत्तिरेव गृह्यते न तु भिन्नकालीनानेकवृत्तिर्डित्थत्वादिः । जातिपदार्थपक्षे सर्वेषां जातिशब्दत्वेऽपि "जात्याख्यायाम्" इत्युक्तिसामर्थ्यात् ।

नन्वत्र पक्षे व्रीहिभ्य आगत इत्यत्र "घेर्ङिति" इति गुणः स्यात् स्थानिवद्भावेन ङ्यादेशस्य भ्यसो ङित्त्वात् । मैवम् ।

एकस्मिन्नर्थे बहुत्वस्यैवानेनातिदेशात् स्थान्यादेशभावविरहात् ।

तदुक्तम्—"अर्थातिदेशात्सिद्धम्" इति ।

एवं "तिष्यपुनर्वस्वोः" इत्यत्रापि द्विवचनबहुवचनशब्दाभ्यां द्वित्वबहुत्वयोरभिधानमिति बोध्यम् ।

"सङ्ख्याप्रयोगे प्रतिषेधो वक्तव्यः" ।

एकस्मिन्बहुत्वातिदेशस्यैकशब्दप्रयोगेऽपि प्राप्तौ प्रतिषेधारम्भः । एको व्रीहिः संपन्नः सुभिक्षं करोति । विकल्पः किम् ! व्रीहिरित्यपि यथा स्यात् । तत्र सम्पन्नो व्रीहिरित्यादौ भिन्नव्यक्तिपरत्वेऽपि एकत्वं व्रीहित्वजातावेवान्वेति क्वचित्पदार्थतावच्छेदकपदार्थयोरप्यन्वयस्वीकारादिति केचित् ।

अन्ये तु व्रीह्यादिपदशक्यतावच्छेदकतया व्रीहित्वादेः स्वरूपत एवोपस्थित्या अन्वयितावच्छेदकव्रीहित्वत्वरूपेणानुपस्थितेस्तत्र पदार्थान्तरान्वयानुपपत्त्या स्वाश्रयप्रकृत्यर्थतावच्छेदकवत्त्वसम्बन्धेन प्रकृत्यर्थे व्रीह्यादावेवैकत्वान्वय इत्याहुः ।

नव्यास्तु नेदं युक्तम् । नह्येकत्वमात्रमेकवचनस्यार्थः वस्तुमात्रसाधारण्यादर्थवत एव लाभादनुपयोगाच्च, किन्तु सजातीयान्तरराहित्यविशिष्टम् । तच्च सजातीयनिष्ठभेदप्रतियोगितानवच्छेदकैकत्वरूपम् । साजात्यं च समभिव्याहृतपदार्थसम्बन्धित्वविशिष्टप्रकृत्यर्थतावच्छेदकरूपेण । तेनात्र घटोऽस्तीत्यादौ एतद्घटनिष्ठस्यैकत्वस्य घटान्तरनिष्ठभेदप्रतियोगितायां वस्त्वन्तरनिष्ठैकत्वस्य चैतद्घटनिष्ठभेदप्रतियोगितायामवच्छेदकतया घटनिष्ठभेदप्रतियोगितानवच्छेदकैकत्वाप्रसिद्धावपि न क्षतिः । एतद्देशविद्यमानत्वविशिष्टघटनिष्ठभेदप्रतियोगितानवच्छेदकत्वस्य तद्घटनिष्ठैकत्वे एव प्रसिद्धेः । तत्र घटान्तरसत्त्वविवक्षायां तु तदप्रसिद्धमेव स्यात् । अत एव "पशुना यजेत" इत्यादावेकत्वस्य

विवक्षितत्वात् तद्यागव्यक्तौ पश्वन्तरव्यावृत्तिः । बहुघटसत्त्वे 'घटोऽस्ति'इति प्रयोगस्तु जात्यभिप्रायेण समर्थनीयः ।

यत्तु भावाख्यातवदत्राप्येकत्वमविवक्षितमेव साधुत्वार्थत्वादिति । तन्न । तत्र गत्यन्तराभावेऽप्यत्र तदभावात् इत्याहुः ।

प्रकृतमनुसरामः—

अत्र वार्त्तिकं "अशिष्यं वा बहुवत्पृथक्त्वाभिधानाद्"इति ।

जातिप्राधान्यविवक्षायामेकवचनस्य द्रव्यप्राधान्यविवक्षायां तु बहुवचनस्य सिद्धत्वात् सूत्रं नारभ्यमित्यर्थः ।

"अस्मदः सविशेषणप्रयोगे नेति वाच्यम्" ।

देवदत्तः गार्ग्यायणः पण्डितो वा अहं ब्रवीमि । त्वं राजा वयमप्युपासितगुरुप्रज्ञाभिमानोन्नता इत्यादौ भवत्येव । निषेधस्यानुवाद्यविशेषणविषयत्वादिति हरदत्तादयः ।

अस्मदो द्वयोश्च ५९ ।

एकत्वे द्वित्वे वा विवक्षिते ऽस्मदो बहुवचनं वा स्यात् । वयं ब्रूमः । अहं ब्रवीमि, आवां ब्रूव इति वा ।

इदमपि भाष्ये प्रत्याख्यातम् । इदं मे अक्षि सुष्ठु पश्यति, अनेनाक्ष्णाऽहं सुष्ठु पश्यामीत्युभयथा लोके प्रयोगदर्शनात् । आद्ये आख्यातस्य संयोगादिव्यापारपरत्वात्, अन्त्ये चाश्रयत्वपरत्वात् । तथा च वयं पश्यामः इत्यादौ वयमित्यनेनेन्द्रियाणामभिधानात् शरीरवत्तत्राप्यहंकारोत्पादात् । एकेन्द्रियप्रवृत्तावितीन्द्रियान्तराणामौदासीन्येन संविधातृत्वात्कर्तृत्वस्य विवक्षितत्वात् । पारतन्त्र्यविवक्षायां त्वहमित्येकवचनम् । युष्मदस्मदोश्चैकशेषऽस्मद एवार्थद्वयाभिधायित्वाद् द्विवचनम् ।

फल्गुनीप्रोष्ठपदानां च नक्षत्रे ६०।

द्वित्वे बहुत्वप्रयुक्तं कार्यं वा स्यात् नक्षत्रेऽर्थे। उदिते पूर्वे फल्गुन्यौ प्रोष्ठपदे वा। उदिताः पूर्वाः फल्गुन्यः प्रोष्ठपदा वा। नक्षत्रे किम्। फल्गुन्यौ माणविके।

इदमपि प्रत्याख्यातम्। तद्युक्तं चन्द्रमसमादाय बहुत्वसंभवात् छत्रिणो गच्छन्तीत्यादिवत्। अमावास्यायामप्यादित्यमण्डलप्रविष्टेन चन्द्रेण नक्षत्राणां योगात्। एकस्यां तूत्तरायां फल्गुनीशब्दस्यावृत्तेः पुष्पवन्तावित्यादिवन्नैकवचनम्। शिष्टप्रयोगस्य नियामकत्वाच्च नातिप्रसङ्गः।

छन्दसि पुनर्वस्वोरेकवचनम् ६१।[1]

विशाखयोश्च ६२।

द्वित्वे एकवचनं वा। पुनर्वसु, विशाखा वा नक्षत्रम्। पक्षे पुनर्वसू, विशाखे।

इमे अपि प्रत्याख्याते। तथा च वार्तिकम्—

"पुनर्वसु विशाखयोः सुपां सुलुक् पूर्वसवर्णेति सिद्धम्" इति॥

तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम् ६३।

---

१ नानयोः सूत्रयोः सर्वेष्वादर्शपुस्तकेषूपन्यासो व्याख्यानं वा उपलभ्यते केवलमेकास्मिन् पुस्तके सूत्रोपन्यासमात्रमुपलभ्य कौस्तुभ—भाष्यानुरोधेन व्याख्यानमपि किञ्चिदुपन्यभान्त्सम्।

बहुत्वं द्वित्ववद्भवति । तिष्यश्च पुनर्वसूच तिष्यपुनर्वसू । तिष्येति किम् । कृत्तिकारोहिण्यः । नक्षत्रेति किम् । तिष्यश्च पुनर्वसू च माणवकाः तिष्यपुनर्वसवः । न चात्र गौणत्वादेव व्याहृत्तिरिति वाच्यम् । तिष्यपुनर्वसुयुक्तकालभवत्वेन माणवकेषु तिष्यपुनर्वसुशब्दस्य मुख्यत्वात् । न च तथापि पूर्वसूत्रादेव नक्षत्रपदलाभ इति वाच्यम् । कालार्थकतिष्यपुनर्वसुशब्दस्य वारणार्थत्वात् । बहवः तिष्यपुनर्वसवो गताः कतरेण तिष्येण गतः । यद्वा अनयोः प्रदेशान्तरस्थमपि कार्यं नक्षत्रत्वे एव स्यादित्येतदर्थम् । तेन "तिष्यपुनर्वस्वोर्नक्षत्राणि यलोप" इत्यत्र नक्षत्रपदं नोपादेयम् । ननु तत्र वाऽत्र वा तदुपादाने न कश्चिद्विशेष इति चेत्तर्हि पर्यायस्यापि ग्रहणार्थम् सिद्धपुनर्वसू इति सिद्धम् । द्वन्द्वेति किम् । यस्तिष्यः स एव पुनर्वसू येषां भ्रान्तानां ते तिष्यपुनर्वसवः । बहिति किम् । समाहारे मा भूत् । उदितं तिष्यपुनर्वसु । न चाप्राणिनामिति पर्युदासाज्जातिप्रयुक्तैकवद्भावानुपपत्तिः । सर्वो द्वन्द्वो विभाषैकवद्भवतीत्यस्य ज्ञाप्यत्वात् । तेन वाभ्रवशालङ्कायनं बाभ्रवशालङ्कायना इत्यादि सिद्धम् । तथाहि—अप्राणिजातिद्वन्द्वे नित्यमेकवद्भावः प्राणिद्वन्द्वे तु विकल्पेन, एकवद्भावप्रकरणं प्राण्यङ्गादीनां समाहार एव द्वन्द्व इति विषयविभागार्थमिति वक्ष्यमाणत्वात् । तथा च तत्प्रकरणानुपात्तानां "चार्थे द्वन्द्व" इत्यनेनैव इतरेतरयोगद्वन्द्वे द्विवचनादि, समाहारद्वन्द्वे त्वेकवद्भाव इति न्यायसिद्धेऽर्थे बहुवचनग्रहणमपि लिङ्गमिति सिद्धम् । तथा च समाहारे प्राण्यङ्गादीनामेव द्वन्द्व इति तत्र विपरीतनियमवारणार्थमेतदिति तात्पर्यम् ।

इति श्रीसिद्धान्तसुधानिधौ प्रथमस्य द्वितीये द्वितीयमाह्निकम् ।

अथ तृतीयमाह्निकम् ।

सरूपाणामेकशेष एकविभक्तौ६४

स्वाद्यन्यतमयावत्प्रत्ययप्रकृतिकानां येषां शब्दानां सारूप्यं तेषां मध्ये एक एव शिष्यते । वृक्षौ वृक्षाः । यद्यपि समानानामित्युक्तौ रूढत्वात्समानपदस्य तुल्यार्थत्वावगमे लाघवम्, सरूपाणामित्यत्र तु पदद्वयार्थावगमपूर्वकान्यपदार्थावगमात्प्रतिपत्तिगौरवम्, तथाऽपि शब्दार्थोभयकृतसाम्यविवक्षापरया वृक्षा इत्यादावेवैकशेषः स्यान्न त्वक्षाः पादा इत्यादौ अर्थभेदात् । "स्वं रूपम्" इत्यत्र रूपग्रहणेन व्याकरणेऽर्थाङ्गीकारस्यापि ज्ञापितत्वात् । रूपग्रहणे तु शब्दस्वरूपमात्रगतं तुल्यत्वं गृह्यते इति न दोषः ।

नन्वेकग्रहणं व्यर्थम् । शेषशब्दस्य भावसाधनत्वपक्षे प्राथम्यादेकस्यैव शेषसिद्धेः । शिष्यते इति शेष इति कर्मसाधनत्वेऽप्येकत्वस्य विवक्षितत्वादेकस्यैव शेषसिद्धेः । मैवम् । आद्ये व्याप्तिन्यायादनेकस्यापि शेषापत्तेः । द्वितीयेऽपि "ग्रहं समाप्टिं" इतिवत्संस्कार्यसंख्याया अविवक्षितत्वात् ।

अथ शेषग्रहणं व्यर्थम् । सरूपाणामेकः साधुर्भवतीति वाक्यशेषाध्याहारेणान्तरतमस्यैकस्योदशस्योपपत्तेः । मैवम् । एकस्यादेशत्वप्रसङ्गात् । "षष्ठीस्थाने योगा"इति नियमात् । ततश्चाश्वश्च अश्वश्चाश्वौ । समुदायघटकयोर्द्वयोर्द्वयोरश्वशब्दयोरादावुदात्तत्वादन्त्ये चानुदात्तत्वात्सर्वोदात्तस्य सर्वानुदात्तस्य वा-

ऽश्वशब्दस्य प्रसङ्गात् । उदात्तद्वयानुदात्तद्वयवतः समुदायस्य स्थाने तदन्यतरवत एवादेशस्यान्तरतमत्वात् ।

अथैकविभक्ताविति किमर्थम् । न च पयः पयो जरयति, वासो वासः छादयति, ब्राह्मणाभ्यां च कृतं ब्राह्मणाभ्यां च देहीत्यादावेकशेषवारणार्थमिति वाच्यम् । सहविवक्षायामित्यस्यावश्यकत्वात् । अत एव "इदितो नुम्धातोः" इत्येकशेषाभावः सङ्गच्छते । परस्परविशेष्यविशेषणभावानापन्नानामेव तत्संभवात् । बहुव्रीहौ तु वार्त्तिकपदार्थानां विशेष्यविशेषणभावसत्त्वात् । वक्ष्यति हि वार्त्तिककारः "न वाऽर्थविप्रतिषेधाद्युगपद्वचनाभाव" इति । युगपद्वचनं सहविवक्षा । यत्र शिष्यमाणो लुप्यमानार्थाभिधानसमर्थस्तत्र ह्येकशेषः । कर्तृत्वकर्मत्वसम्प्रदानत्वादयश्च एकेन युगपद्बोधयितुमशक्याः । युगपदेकस्माद्विभक्तिद्वयानुत्पत्तेः । चतुर्थ्यन्तस्य शेषे च ब्राह्मणेभ्य इत्युक्ते कर्तृत्वस्य, तृतीयान्तस्य शेषे ब्राह्मणैरित्युक्ते सम्प्रदानत्वस्यानवगमात् । एकेन भिन्नेन वा पदेनोपस्थितानामैकरूप्येणैव प्रत्ययार्थान्वयादित्यर्थः ।

मैवम् । तस्य सारूप्योपलक्षणार्थतायां वक्ष्यमाणत्वात् ।

स्यादेतत् । अनेकव्यक्तिबुबोधयिषायामनेकशब्दप्रयोगे प्राप्ते तन्निवृत्त्यर्थं तावदयमारम्भः । ततश्च विरूपानेकशब्दप्रयोगस्य धवखदिरौ इत्यादौ दर्शनात् सरूपैकशेषारम्भवत् वृक्षा इत्यादौ सरूपैकशेषदर्शनाद्विरूपाणामनेकशेष इत्येवाऽऽरभ्यताम् दृष्टान्तमात्रस्य हेत्वभावस्य चोभयत्र साम्यात् । प्रयोगानुसरणे तु किञ्चिदारब्धव्यम् । व्यक्तिपक्षेऽपि एकस्यापि शब्दस्य बह्वर्थबोधकत्वसम्भवादन्यथैकशेषारम्भेऽप्यनिर्वाहात् । शब्दशक्तेर्वचनमूलकत्वा-

भावात् । किञ्च सरूपैकशेषे गौरवं द्वयोरेकशेषे एकस्य, यदा त्रयाणामेकः शिष्यते तदा द्वयोश्चतुरादीनामेकशेषे त्रयादीनां निवृत्तिरेकस्य च प्रवृत्तिर्व्याख्येये इति प्रवृत्तिनिवृत्तिलक्षणविषयभेदाद्बुद्धिगौरवापत्तेः । शेषशब्दस्य निवृत्तिविशिष्टावस्थानवाचित्वात् विरूपानेकशेषारम्भे तु प्रवृत्तिविषया बुद्धिरेकरूपैवेति लाघवम् । उच्यते । "वृद्धो यूना"त्यादावेकशेषस्यैव विधेयत्वात् इह त्वनेकशेषविधाने प्रस्थानद्वयापत्त्या लाघवादेकशेषस्यैव युक्तत्वात् ।

इदं त्ववधेयम्—एकपदस्य पूर्वोक्तरीत्या सजातीयान्तरराहित्यार्थकतया शब्दान्तरनिवृत्तिरेव विधीयते, अवस्थानं तु सिद्धत्वादनूद्यते । अत एव कैयटेन प्रवृत्तिनिवृत्तिलक्षणविषयभेदादित्युक्तम् । आपाततो "दध्ना जुहोति"इत्यादिवदवस्थानस्यापि विधेयत्वप्रतीतेः । निवृत्तेरवस्थाने वैशिष्ट्यञ्च निवर्त्तमानपदसमभिव्याहाराभावरूपम् । प्रतियोगिप्रसिद्धिश्च श्रूयमाणतत्पदसमभिव्याहृतशब्दान्तरस्थले एव अलौकिकप्रक्रियावाक्य एव वा सुलभा ।

स्यादेतत् । षडत्र पक्षाः सम्भवन्ति । तथाहि—समुदायादेकविभक्तौ परत एकशेषो विधीयते एकशब्दस्य संख्यावाचित्वेन प्रसिद्धत्वात् । ननु "ङ्याप्प्रातिपदिकात्" इत्यत्रैकवचनान्तानामेव द्वन्द्वः क्रियते वृत्तिपदार्थानां सर्वत्रैकत्वभानस्यौत्सर्गिकत्वात् । यौष्माकीन इत्यादौ आदेशादिबलादेव बहुत्वादिप्रतीतेः, तथा चैकत्वस्य विवक्षितत्वादेकस्मादेव प्रातिपदिकात्स्वादयो न तु समुदायात् । "कर्त्तुरीप्सिततमम्" इत्यादौ तु द्वयोर्बहूनां वा ईप्सितस्य कर्मसंज्ञादर्शनाल्लक्ष्यानुरोधान्न संख्याविवक्षेति वैषम्यम् । तथा च समुदायादेकस्या विभक्तेः

परत्वाभावादसंभव एव । तदुक्तं "एकविभक्ताविति चेन्नाभावाद्विभक्तेः" इति ।

मैवम् । स्वार्थमादायावयवयोरिव परस्परापेक्षायां सत्यां समुदायार्थस्याप्यवयवार्थातिरिक्तस्यानुभूयमानत्वात् तमादाय समुदायस्याप्येकप्रातिपदिकत्वाद्विभक्त्युपपत्तेः । नचार्थवत्समुदायानां समासग्रहणं नियमार्थमिति वाच्यम् । तस्य सजातीयविषयकत्वात् सुबन्तानामेव व्यावृत्तेः । राजदर्शीत्यादावुपपदादिसमासेऽपि पूर्वपदस्य नलोपादिपदकार्यानुरोधेन सुबन्तत्वात् । तथा चैकाज्द्विर्वचनन्यायेन समुदायादेव द्विवचनाद्युत्पत्तिः । तेनैवावयवार्थानां संख्यान्वयात्मकानुग्रहसंपत्तेः । न च राजन् राजन् औ इत्यत्र परत्वान्नित्यत्वाच्चोपधादीर्घे कृते वैरूप्यादेकशेषो न स्यात् इति वाच्यम् । "विरूपाणामपि समानार्थानाम्" इति तत्सम्भवात् ।

यद्वा अन्तरङ्गत्वादेकशेषः । संबुद्धिभिन्नसर्वनामस्थानरूपविभक्तिविशेषम्, उपधां चापेक्षमाणस्य दीर्घस्य बहिरङ्गत्वात् । न च द्वन्द्वेऽपि द्वन्द्वं विनैव समुदायाद्विभक्तिप्रसङ्ग इति वाच्यम् । तद्विधावनेकं सुबन्तमित्यनुवृत्त्या उक्तन्यायबाधात् । तथा च वृक्ष वृक्ष औ इति स्थिते एकशेषप्रवृत्तिरित्येकः पक्षः ।

यद्वा पृथग्विभक्तौ परत एकशेषः । ननु वृक्ष सु वृक्ष सु इति स्थिते विभक्तौ परतः सरूपाणामेकशेषस्य विभक्तिनिमित्तकत्वात् प्रकृतिनिवृत्तौ तदुत्तरविभक्तेः केवलायाः प्रयोगः स्यात् । न च केवलयोः प्रकृतिप्रत्ययोः प्रयोग इति निषेध इति वाच्यम् । तयोः परस्परलोपप्रयोजकत्वे 'अग्निचिद्' 'इयती' इत्यादौ परस्परराहित्येऽपि प्रयोगदर्शनात् । न चान्येषां सकाराणां संयोगान्तलोपेन निस्तारः । संयोगान्तं

यत् पदं तदन्तस्य तद्विधानात् । वृक्षस्स्स्स् इति स्थिते च वृक्षस् इत्येकम्, स् इति द्वितीयम्, स् इति तृतीयं पदमिति कस्यापि पदस्य संयोगान्तत्वाभावात् । एतेन संयोगादिलोपोऽपि परास्तः ।

मैवम् । "संयोगान्तलोप"इति भाष्यस्य संयोगान्तस्यान्तः सकारस्तस्य लोपः । स च हल्ङ्यादिसूत्रेणेतिव्याख्येयत्वात् । इति द्वितीयः ।

अथवा समासादेकविभक्तौ परत एकशेषोऽस्तु । प्रथमसूत्राद् द्वन्द्वे इत्यनुवृत्तेः । तथा च वृक्षश्च वृक्षश्चेति द्वन्द्वे वृक्षवृक्षऔ अत्रैकशेष इति । तदुत्तरविभक्तेः "सुपो धातु–" इतिलोपान्न श्रवणापत्तिरिति तृतीयः ।

यद्वा पृथक् सर्वेषां वित्यन्तानामेकशेषः एकविभक्तीनामिति न्यासाश्रयणात् । सप्तमीनिर्देशे हि प्रकृतिमात्रनिवृत्तौ प्रत्ययश्रवणप्रसङ्गः, उक्तरीत्या तु विभक्त्यन्तानामेव निवृत्त्या नेति चतुर्थः ।

अथवा प्रातिपदिकानामेवैकशेषः । तथाहि–एकविभक्ताविति न क्रियते । "ह्रस्वो नपुंसके" इति सूत्रात्प्रातिपदिकग्रहणमनुवर्त्यानुत्पन्नायामेव विभक्तौ सरूपाणां प्रातिपदिकानामेकशेषो विधीयते । तिङन्तेष्वपि पचूल् पचूल् इति स्थिते कृदन्तत्वात्प्रातिपदिकसंज्ञायां तदुपपत्तेः । तथा च लुप्यमानप्रकृतिकविभक्तिश्रवणस्य नापत्तिः । न च प्रातिपदिकमात्रसारूप्यविवक्षायां जननीपरिच्छेत्तृवाचिनोरपि मातृशब्दयोरेकशेषापत्तिः । विभक्त्यन्तानामेकशेषपक्षेऽपि तुल्यत्वात् । क्वचिद्विभक्तौ सारूप्यसत्त्वात् । न च प्रातिपदिकावस्थायां सारूप्यस्य सार्वदिकत्वात्सर्वत्रैकशेषापत्तिः । विभक्त्यन्तानां सरूपाणामेकशेषे तु यस्यां

तृतीयादिविभक्तौ सारूप्यं तत्रैकशेषो नत्वन्यत्रेति वाच्यम् । अर्थविप्रतिषेधादत्राप्येकशेषानापत्तेः । मातृशब्दद्वयैकशेषे ताभिरित्यनुप्रयुक्ते पुमर्थस्य, तैरित्युक्ते च स्त्र्यर्थस्यानवबोधात् इति पञ्चमः ।

यद्वा द्विवचनबहुवचनान्तानामेकशेषः । युगपदधिकरणविवक्षायां चैकैकस्य पदस्यार्थद्वयबोधकत्वात् वृक्षावित्यादौ द्विवचनादिसिद्धिः । न चैवं एकशेषेण नित्येन वृक्षश्च वृक्षश्चेति वाक्यबाधापत्तिः । तत्र सहविवक्षाविरहात् भिन्नार्थत्वादेकशेषवृत्त्या वाक्यबाधाभावात् । इदं च द्वन्द्वे इत्यनुवर्त्य द्वन्द्वे प्रसक्ते सतीति व्याख्यानाल्लभ्यते इति षष्ठः ।

तत्र–नाद्यः । भिक्षाणां समूहो भैक्षमित्यादेरसिद्धेः । तथाहि–भिक्षा भिक्षा भिक्षा आम् अ इति स्थिते सर्वविधिभ्यो लुग्विधेर्बलवत्त्वादामो लुकि कृते एकशेषो न स्यात् । विप्रतिषेधपरत्वाभावात् । न च प्रत्ययलक्षणम् । "न लुमताऽङ्गस्य" इति तन्निषेधात् । राम राम औ इत्यत्रापि परत्वाद्धौ हेत्वभावादेकशेषो न स्यात् । न चान्तादिवद्भावेन विभक्तेः परत्वमिति वाच्यम् । उभयत आश्रये तन्निषेधात् ।

न द्वितीयः । द्विवचनबहुवचनार्थं द्वन्द्वप्रतिषेधार्थं च वचनान्तरारम्भापत्तेः । न चानवकाश एकशेषो द्वन्द्वबाधकः । तिङन्तेषु एकशेषस्य सावकाशत्वात् । कारकभेदेन क्रियाभेदादनेकतिङन्तप्रसङ्गात् । ततश्च परत्वात् द्वन्द्वः स्यात् । न च तदुत्तरम् एकशेषः । सकृद्गताविति न्यायात् । पुनः प्रसङ्गविज्ञानेऽपि वक्ष्यमाणरीत्या स्वरसमासान्तेषु दोषप्रसङ्गात् । वृक्षम् वृक्षमूइत्यत्र पूर्वस्यापि वृक्षशब्दस्य पाक्षिकनिवृत्तिप्रसङ्गे मूवृक्षावित्यापत्तेः । परस्यैव निवृत्तौ नियामकाभावात् । एवं बहुत्वेऽपि

योज्यम् । न च संयोगादिलोपेन सिद्धिः । एकपदसम्बन्धी यः संयोगस्तदादेर्हलोऽत्राभावात् । स् स् इत्यनयोः प्रत्येकं पदत्वात् । इदं चोपलक्षणं परानिवृत्तावपि पूर्वोक्तस्य हल्ङ्यादिलोपस्यानुपपत्तेः । सुतिसीतिप्रत्ययैः प्रकृत्याक्षेपात् हलन्तायाः प्रकृतेः परेषामेव स्वादीनां लोपविधानात् । एवं गोदौ दाराः सिकता इत्यादीनां नियतवचनानां यत्रैकशेषस्तत्र हल्ङ्यादिलोपादेः शङ्कितुमप्यशक्यत्वाच्च । एतेन संयोगान्तस्य पदान्तस्येति पक्षाश्रयेणापि निर्वाहो न सम्भवतीति दिक् । एवं शिष्यमाणप्रातिपदिकोत्तरविभक्तेः श्रवणप्रसङ्गश्चेत्यवधेयम् ।

नापि तृतीयः । तदुक्तम्–"समास इति चेत्स्वरसमासान्तेषु दोषः" इति ।

तथाहि अश्वश्चाश्वश्चेति द्वन्द्वे समासान्तोदात्तत्वे शेषनिघाते च यदि पूर्वशेषस्तदा सर्वानुदात्तत्वापत्तिः, अथ परशेषस्तदाऽन्तोदात्तत्वप्रसङ्गः परत्वादेकशेषं बाधित्वा समासान्तोदात्तत्वप्रवृत्तेः । न च येननाप्राप्तिन्यायेनैकशेषः समासान्तोदात्तत्वापवाद इति वाच्यम् । तदुत्तरमप्येकशेषप्रवृत्तिसम्भवाद्विरोधाभावाच्च । एवं ऋच् ऋच् अ इति स्थिते ऽन्तर्वर्तिन्या विभक्तेर्लुका लुप्तत्वात् प्रत्ययलक्षणप्रतिषेधाच्च विभक्तिपरत्वाभावादेकशेषार्थं समुदायादन्या विभक्तिरुत्पाद्या, तस्यां च नास्ति सारूप्यम् । एको हि ऋच्शब्दः, अपर ऋचशब्दः । न च समासान्तः समासस्यैवावयवो नतूत्तरपदस्येति वाच्यम् । समासान्तकृतव्यवधानेन विभक्तिपरत्वाभावादेकशेषानापत्तेः । न चायमेव दोषो वक्तव्यो नत्वसारूप्यमिति वाच्यम् । समासार्थस्योत्तरपदस्यावयवः समासान्त इति

पक्षमाश्रित्य तथोक्तत्वात् । एवं स्वसा च स्वसारौ चेत्यत्र परत्वाद् गुणदीर्घयोः कृतयोः सारूप्याभावादेकशेषो न स्यात् । एवं नौश्च नावौ चेत्यादावनङ्कार्ये आवादेशादावपि बोध्यम् । तथा हि यद्यन्तर्वर्त्तिन्यां विभक्तौ लुक्ता लुप्तायामपि वचनसामर्थ्यात्प्रत्ययलक्षणमाश्रीयते तदाऽत्र वैरूप्यम्, अथ समासविभक्त्यैकविभक्तिपरत्वं तथाऽपि वैरूप्यतादवस्थ्यम् । एवम् "आख्यातमाख्यातेन"इत्यत्र प्रकरणे द्वन्द्वश्च सरूपाणामिति कल्पनीयम् । अन्यथा तिङन्तानामेकशेषानापत्तेः ।

नापि चतुर्थः । लुप्यमानानां प्रत्ययेन सहैव निवृत्तावपि शिष्यमाणप्रकृतिकप्रत्ययस्य श्रवणापत्त्या तल्लोपविधानस्य द्विबहुवचनविधानस्य द्वन्द्वप्रतिषेधवचनस्य चारम्भणीयत्वात् ।

नापि पञ्चमः । भैक्षमित्यस्यासिद्धेः । समर्थस्य यद् ङ्याप्प्रातिपदिकं तस्मात्तद्धिता इत्यबन्तादाणि कृते परत्वादादिवृद्धौ कृतायां वैरूप्यादेकशेषानापत्तेः । हरितस्य स्त्री हरिणी, एव हरिणस्यापि । हरिणी च हरिणी च हरिण्यावित्येकशेषानुपपत्तेश्च । प्रातिपदिकावस्थायां वैरूप्यात् । एवं श्येन्यौ रोहिण्यावित्यत्रापि । यद्यपि हरितशब्दात्पुंयोगे ङीषा हरितीति रूपं तथाऽपि हरितशब्दस्य स्त्री हरिणी स्त्रीप्रत्ययान्तो हरितशब्द इति यावदिति कैयटः । प्रातिपदिकग्रहणस्य विच्छिन्नत्वाच्च प्रातिपदिकानां लोके प्रयोगाभावात्सारूप्यस्य पदान्तर्भावेणैव ग्रहणात् । तदुक्तम्–"न वा पदस्यार्थे प्रयोगाद्" इति ।

नापि षष्ठः । जहत्स्वार्थायां वृत्तौ पदद्वयस्याप्यनर्थकत्वात् एकैकस्यानेकार्थाभिधायित्वानुपपत्तेः । अजहत्स्वार्थावृत्तिपक्षेऽपि प्रथमप्रवृत्तस्यैकवचनस्य त्यागायोगात् । अन्यथा षष्ठीतत्पुरुषाद्ययोगात् तत्रापि पूर्वपदस्योत्तरपदार्थे उपसंक्र-

मेण षष्ठ्याश्रयोगात् । तथा च भाष्यम्–"सेयं युगपदधिकरणवचनता दुःखा च दुरुपपादाच" इति । एतच्च द्वितीये प्रपञ्चयिष्यामः । तस्मात्पडपि पक्षा दुष्टा एवेति प्राप्ते सिद्धान्तमाह भाष्यकारः—

"प्रातिपदिकानां चैकशेषे सिद्धम्"इति । तथाहि–एकशेषे न एकविभक्तिर्निमित्तं किं तर्हि सारूप्ये उपलक्षणम् । एकविभक्तौ लौकिकप्रयोगे यानि सरूपाणि दृष्टानि तेषामेकशेषः । स चानैमित्तिकत्वाद्विभक्तिं नापेक्षते इत्यन्तरङ्गत्वात्सुबुत्पत्तेः प्रागेव प्रवर्त्तते । भाष्ये प्रातिपदिकग्रहणं चोपलक्षणम् । तेन हरिण्यादीनामपि तत्सिद्धिः । "स्वरभिन्नानां यत् परं तच्छिष्यते"इति वचनान्ङीवन्तस्य हरिणीशब्दस्य शेषः । केचित्तु हरितहरिणशब्दयोरेवैकशेषे उभयवाचित्वे ऽप्यन्यतरस्य वर्णवाचित्वं चाश्रित्य स्त्रीप्रत्यय इत्याहुः, तेषां पक्षे स्वरभेदप्रसङ्ग इति कैयटः । भैक्ष्यमित्यादावप्यनैमित्तिकत्वेनान्तरङ्गत्वात्पूर्वमेकशेषस्ततो वृद्धिः । यद्वैकशेषोत्तरमेव तद्धितोत्पत्तिरिति न दोषः ।

तस्मादयमत्रार्थः–विभक्तिपदमत्र स्वादिमात्रपरम्, सत्यप्याश्रयभेदेन क्रियाभेदे निवृत्तभेदाया एव तस्यास्तिङन्तेन बोधात् । प्रकर्षाभ्यावृत्त्यादीनां च स्वाश्रयाभ्यावृत्त्यादिनिमित्तकत्वात् । पचत इत्यादिद्विवचनादीनां च कर्त्रादिनिष्ठसंख्याप्रतिपादकत्वात् । नच कर्तृकर्मणोर्विहितस्य लकारस्य तद्भेदाद्भेद एव युक्त इति वाच्यम् । इष्टापत्तेः । "लस्य" इत्यत्र लत्वजातेराश्रयणादनेकेषामपि लकाराणां स्थानेऽर्थत आन्तर्यात् द्विवचनबहुवचनयोः प्रवृत्तेः । एकपदं च समानार्थकं सत्सजातीयार्थकम् । साजात्यं च न विभक्तित्वेन विभक्तिपदादेव सिद्धेः, तदुपादानस्यापि वैयर्थ्यापः

त्तेश्च । विभक्तित्वावच्छेदेन सारूप्यस्यासम्भवादेवाविवक्षणीयत्वात् । तत्सामानाधिकरण्यमात्रेण सारूप्यस्य च सरूपपदोपादानादेव लाभात्, किन्तु विभक्तित्वव्याप्येन सुत्वादिना । न तु प्रथमात्वादिना । वृक्षः वृक्षौ वृक्षा इत्यादावपि सारूप्याभावात् । तात्पर्यवशाच्च प्रकृत्यर्थतावच्छेदकसुत्वादिधर्माणां यावत्त्वं गम्यते । तादृशयत्किञ्चिद्धर्मावच्छेदेन सारूप्यस्य तद्व्यतिरेकेणैव सिद्धेः । अवच्छिन्नत्वं च सप्तम्यर्थः । तथा च विभक्तित्वव्याप्या यावन्तः सुत्वादिधर्माः प्रत्येकं तदवच्छिन्नयावत्प्रत्ययव्यक्तिषु सारूप्यमित्यर्थः । सुत्वादियावद्धर्मावच्छिन्नाया एकस्याः प्रत्ययव्यक्तेरप्रसिद्धत्वात्प्रत्येकमित्युक्तम्, सुत्वाद्यवच्छिन्नयत्किञ्चिद्व्यक्तौ सारूप्यवारणाय यावदित्युक्तम् । तेन जननीपरिच्छेत्तृवाचिनोर्मातृशब्दयोर्नैकशेषः । औ इत्यारभ्य शस्पर्यन्तं सारूप्याभावात् । एतेनोत्तरसूत्रस्थस्यैवकारस्येहानुकर्षणात्सरूपाण्येवेत्यर्थो लभ्यते इत्यपास्तम् । उक्तरीत्यैव तल्लाभात् ।

नन्वेवं नियतवचनानां दाराश्च दाराश्चेत्यादीनामेकशेषो न स्यात् । मैवम् । यावत्यः प्रत्ययव्यक्तयो यस्मात्सम्भवन्ति तदवच्छेदेन सारूप्यस्य विवक्षितत्वाद् इति दिक् ।

स्यादेतत् । गर्गा इति न सिद्ध्यति । अपत्यबहुत्वे हि यञोऽपि बहव उत्पाद्याः प्रत्यर्थशब्दनिवेशाद्, अन्यथैकशेषवैयर्थ्यात् । न च द्वितीयादीनां यञां प्रकृतेः परत्वं न स्यादिति वाच्यम् । यञाकृतेरेकत्वाद्व्यवधानाभावात् । गर्ग य य य इति स्थिते प्रथमयञः प्रकृतिसन्निपातकृतवैरूप्यादेकशेषो न स्यात् । एवं विभक्तिनिमित्तकत्वपक्षेऽपि समुदायस्य तद्धितान्तत्वात्प्रातिपदिकसंज्ञायां एकविभक्त्युत्पत्तौ बोध्यम् । सहविवक्षायां विभक्त्यन्तानामेकशेष इति पक्षेऽपि गर्ग य अस् य अस्

इति स्थिते ऽप्येवम् । न च प्रकृत्यंशं विहाय यशब्दानां सारूप्यात्तदुपपत्तिः । प्रकृतिविशिष्टसमुदायादेव विभक्त्युत्पत्त्या तल्लक्षितसारूप्याश्रये एकशेषे विभक्तिबहिर्भावस्यानुचितत्वात् । यञां प्रकृत्यर्थानपेक्षसमुदायानभिधायित्वाच्च । न चैकैकस्य प्रत्ययार्थस्य प्रकृत्यर्थेन योगात्प्रधानावृत्त्या च गुणावृत्तेन्यार्थ्यतया गर्गशब्दानामपि बहुत्वाद्गार्ग्यशब्दानामेवैकशेष इति वाच्यम् । "तद्राजस्य बहुषु"इति यलोपानुपपत्तेः । बहुषु वृत्तेर्यञादेरेव तद्विधानात् । तस्य च यञामेकशेष एव शिष्यमाणयञो बह्वर्थकत्वादुपपत्तेः । उक्तरीत्या तु यञन्तस्यैव बह्वर्थकत्वात् ।

मैवम् । तत्कृते बहुत्वे इत्यस्यापि तदन्तकृते बहुत्वे इत्येव व्याख्यानात् । न चैकस्मिन्कश्यपापत्येऽञि कृते तस्माद् "इवे प्रतिकृतौ"कन् । "जीविकार्थे चापण्ये"इति तस्य लुक् । प्रतिकृतिबहुत्वविवक्षायां काश्यपा इत्यत्रापि लुक् स्यात्, अञन्तस्य बह्वर्थकत्वादिति वाच्यम् । अपत्यबहुत्ववाचिन एव लोपविधानात् अस्य च प्रतिकृतिबहुत्ववाचित्वात् । यद्वा एकस्मादेव गर्गशब्दात्परेषां बहूनां यञां सत्यपि प्रकृतिसान्निपातकृतवैरूप्ये सर्वेषां प्रकृत्यर्थविशिष्टापत्याभिधायित्वाद् "विरूपाणामपि समानार्थानाम्"इत्येकशेष इति सिद्धम् । यद्येतत्सूत्रं न स्यात्तर्हि प्रत्येकं विभक्त्युत्पत्तौ द्वन्द्वः स्यात्, सति त्वनेकसुबन्ताभावान्न तत्प्रसक्तिः । एतेन द्वन्द्वापवाद एकशेष इति व्याख्यातम् ।

ननु पदार्थतावच्छेदकभेदे द्वन्द्व इति पक्षे घटश्च घटश्चेति द्वन्द्वस्य न प्रसङ्ग इति चेन्न । पदार्थभेदे द्वन्द्वपक्षे सम्भवात् । पयसी इत्यत्र जलत्वदुग्धत्वरूपपदार्थतावच्छेदकभेदसत्त्वाच्च । स्यादेतत् । एकश्च, एकश्च द्वौ च द्वौ चेत्येकशेषः स्यात् । अत्र

वार्त्तिकम्–"संख्याया अर्थासंप्रत्ययादन्यपदार्थत्वाच्चानेकशेषः" इति । यत्रैकः शब्दोऽनेकार्थाभिधानसमर्थः तत्रैवैकशेषः । प्रयुक्तानामेवान्वाख्यानात् । एकानित्युक्ते च सहायादेरेवार्थस्य प्रतीत्या द्वित्वप्रतीत्यभावात् । अन्यपदार्थत्वाच्चेत्यस्यासंदिग्धेन पदान्तरेण द्वावित्यादिनैव तदर्थः प्रत्याय्यते इत्यर्थः । एतेन तत्र द्वन्द्वो ऽपि नास्त्यनभिधानात् । ननु गार्ग्यावित्यत्र गार्ग्यश्च गार्ग्यश्चेति सरूपैकशेषस्यापि सम्भवात्सन्देहादर्थासंप्रत्ययेऽपि एकशेषो दृश्यते उत्तरकालं प्रकरणादिना सन्देहनिवृत्तेः । न च तत्र "वृद्धो यूना" इत्यारम्भसामर्थ्यात् तथा, अत्र त्वसन्दिग्धविषयसम्भवान्नेति वाच्यम् । अक्षा इत्यादावप्यप्रवृत्त्यापत्तेः । मैवम् । अर्थासम्प्रत्यये सत्यन्यपदार्थत्वादिति विशिष्टस्य हेतुत्वात् ।

अत्रेदं तात्पर्यम्–यत्पदार्थतावच्छेदकावच्छिन्नं द्वित्वादिपर्याप्त्यधिकरणं तत्पदयोरेकशेषः । एकत्वावच्छिन्नं तु न द्वित्वादिपर्याप्त्यधिकरणम् । ननु घटत्वाद्यवच्छिन्नमपि प्रत्येकं न तथा, मिलितं त्वेकत्वावच्छिन्नमपि तथेति तुल्यम् । न च तत्र पदार्थताऽवच्छेदकं घटत्वादिकमुभयत्राप्यभिन्नम्, एकत्वं तु प्रतिव्यक्ति भिन्नमिति वाच्यम् । पयसी इत्यादावपि जलत्वदुग्धत्वरूपपदार्थतावच्छेदकयोः सामानाधिकरण्याभावात् । मैवम् । यत्पदार्थतावच्छेदकं प्रत्ययार्थसंख्यानिष्ठप्रतियोगितावच्छेदकताकभेदप्रकारतानिरूपितविशेष्यतावच्छेदकं न भवति, तत्पदयोरेकशेषः । एकत्वं तु एको द्वित्ववच्छिन्न इति प्रतीतौ विशेष्यतावच्छेदकमेव । पर्याप्तिसम्बन्धस्य प्रतियोगितावच्छेदकत्वलाभाय प्रत्ययार्थेत्युक्तम् । एकयोः घटाविति प्रयोगाभावेन विभक्त्यर्थद्वित्वादेः पर्याप्त्यैवान्वयस्य व्युत्पन्नत्वात् । एको द्वित्ववानि-

त्यत्र तु द्वित्वमाश्रयत्वमात्रेण विशेषणं न तु पर्याप्त्येति न-दोषः । घटो द्वित्ववद्भिन्न इत्यत्रापि एकत्वमेव यथोक्तभेद-प्रकारतानिरूपितविशेष्यतायामवच्छेदकं न तु घटत्वं न द्वाविति प्रयोगाभावात् । अत एव चैत्रो मैत्रश्च गच्छतः इत्यत्र प्रत्ये-कमेकत्वान्वयेऽपि चैत्रत्वमैत्रत्वे धर्मितावच्छेदकीकृत्यैवाख्या-तार्थद्वित्वान्वयधीर्न त्वेकत्वमपीत्यदोषः । एवं द्विशब्दादावपि योज्यम् ।

प्रकृतमनुसरामः–एकार्थानामपि विरूपाणामेकशेषो वक्त-व्यः । वक्रदण्डश्च कुटिलदण्डश्च वक्रदण्डौ कुटिलदण्डौ वा । स-रूपाणामित्यनेन समानार्थकत्वस्यापि सङ्ग्रहात् । "स्वरभिन्नानां यस्योत्तरस्वरविधिस्तस्यैकशेषो वक्तव्यः" । स्वरेण भिन्नानां भिन्नस्वराणामिति यावत् । अक्षश्चाक्षश्च अक्षौ । एकोऽक्षशब्दोऽशे-र्देवने इति सप्रत्ययान्तत्वादन्तोदात्तः । द्वितीयस्तु घञन्तत्वादा-दाद्युदात्त इति तस्यैकशेषः । मीमांसकौ । एको मीमांसकशब्दो ण्वुलन्तत्वान्मध्योदात्तः अपरस्तु मीमांसामधीते इति "क्रमा-दिभ्यो वुन्" इति आद्युदात्तस्तस्यैकशेषः ।

इदमप्यवधेयम्–घटावित्यादौ पदार्थतावच्छेदकसामाना-धिकरण्येन द्वित्वं प्रतीयते, अक्षावित्यादावपि पदार्थतावच्छेद-कयोर्विभीतकत्वदेवनत्वयोः परस्परसामानाधिकरण्याभावे ऽपि प्रत्येकं तदधिकरणयोर्द्वयोर्द्वित्वान्वये द्वित्वेन सह तयोः सामाना-धिकरण्यमव्याहतम्, पदार्थतावच्छेदकयोः परस्परसामानाधिक-रण्यप्रत्ययस्यानुभवसिद्धत्वाभावात् प्रयोजनाभावात् घटावित्या-दावसम्भवाच्च । एकशेषस्थले च अक्षपदमेव एकपदार्थतावच्छे-दकप्रकारकत्वविशिष्टापरपदार्थतावच्छेदकप्रकारकज्ञानजनकम् । अनुभवानुरोधात् । तथाचानारभ्य एवैकशेषः । एकेनैव तादृशा-

र्थबोधसिद्धेः, अन्यथा तदारम्भेऽप्यनिस्तारात् । नहि स्वतोऽसती शक्तिराचार्येण कर्तुं शक्यते । शब्दशक्तेर्लोकप्रयोगमात्रकल्प्यत्वात् । नचैवमग्निचित् सोमसुदित्यादौ क्विब्लोपादेरपि वैयर्थ्यापत्तिः । प्रत्ययलक्षणादेस्तत्प्रयोजनत्वात् । एकशेषस्य च प्रक्रियायामुपयोगविरहात् । नचैकेन शब्देन कथमनेकार्थाभिधानमिति वाच्यम् । तुल्यत्वात् वृत्तिविषयतावच्छेदकावच्छिन्नबोध्यत्वात् । एकद्विबहूनामर्थानां घटो गोदौ दारा इत्यादिशब्दवृत्तिविषयत्वस्यापि विशेषात् । नचैवं प्लक्षन्यग्रोधावित्यादावपि सहविवक्षायां समुदायार्थप्रादुर्भावादेकेनैवार्थद्वयबोधात् द्वितीयप्रयोगो न स्यादिति वाच्यम् । प्लक्षावित्युक्ते प्लक्षान्तरेणैव सहत्वप्रतीतेः । क्वचित् द्विरूपेणाप्यर्थद्वयाभिधानदर्शनाच्च । यथा—द्यावाक्षामा । द्यावा चिदस्मै पृथिवी नमेते इति । द्योशब्देनात्र द्यावापृथिव्योरभिधानम् । औकारस्य "सुपां सुलुग्" इत्याकारादेशः । "गोतो णित्" इत्योकारान्तग्रहणात् णित्त्वाद् वृद्धिस्तत आवादेशः। पृथिवीइति द्विवचनान्तम्। "वा छन्दसि" इति पूर्वसवर्णदीर्घः । पृथिवीपदेन दिवस्पृथिव्योरभिधानम् । तथाच प्रकरणादिवशाद्यत्रार्थविशेषनिर्णयस्तत्र प्रवृत्तिनिमित्तभेदे ऽपि विरूपस्याप्यनेकार्थाभिधायित्वदर्शनात्सरूपस्य सुतरां तदुपपत्तेः ।

एतेन नानार्थानुरोधादेकशेषारम्भ इत्यपास्तम् । उक्तरीत्या एकेनैव शक्यतावच्छेदकद्वयप्रकारकधीसम्भवात् । नच द्वन्द्ववारणार्थमयमारम्भः । अनभिधानादेव तत्सिद्धेः ।

तदेवं पक्षद्वये ऽपि सूत्रं प्रत्याख्यातम् ।

अत एव "सरूपाणाम्" इति "जात्याख्यायाम्" इति च सूत्रयोर्भाष्यकृता प्रत्याख्यास्यमानत्वेऽपि लक्ष्यानुरोध एव

पक्षद्वयाश्रये बीजमित्युक्तं कौस्तुभे पस्पशायाम् ।

पदार्थतावच्छेदकैक्यस्थलाभिप्रायेण तु प्राह वार्त्तिककारः—"आकृत्यभिधानाद्वैकं विभक्तौ वाजप्यायनः" इति । सूत्राभिप्रायवर्णनमात्रार्थं वार्त्तिकान्तरं "द्रव्याभिधानं व्याडिः" इति । जातिव्यक्त्योः पदार्थत्वे तारतम्यं विप्रतिषेधसूत्रे निरूपयिष्यामः ।

जातिसद्भावे प्रमाणमाह—"प्रख्याऽविशेषाद्"इति । प्रख्याया बुद्धेरविशेषादेकरूपत्वात् । भिन्नव्यक्तिविशेष्यकयोरपि गौरित्याकारकयोर्द्वयोर्बोधयोः समानप्रकारकत्वानुभवात् । एवं चैकत्वमपि जातेर्धर्मिग्राहकमानसिद्धम् । लाघवेन नित्यत्वकल्पनाच्च नाश्रयनाशनाश्यत्वम् । नचैकस्या जातेर्युगपदनेकव्यक्तिषु कथं वृत्तिरिति वाच्यम् । तस्या अपि धर्मिग्राहकात्सिद्धेः ।

यत्तु "एक इन्द्रो ऽनेकस्मिन्क्रतुशते आहूतो युगपत्सर्वत्र भवति"इति भाष्यं तद् अभ्युच्चयमात्रम् । कायव्यूहेन तदुपपत्तेरुत्तरमीमांसायां निरूपितत्वात् । अचेतनदेवतापक्षे तु सन्निधानस्यैवानङ्गीकारात् ।

ननु गोत्वं व्यापकमवश्यं वाच्यम्, अन्यथा उत्पन्ने गोपिण्डे तत्प्रत्ययो न स्यात् । तदुक्तं वाह्यैः—

न याति न च तत्रासीदास्ति पश्चान्नचांशवत् ।
जहाति पूर्वं नाधारमहो व्यसनसन्ततिः ॥
ततश्च घटादावपि गोत्वप्रकारकप्रत्ययः ।

तदुक्तम्—

व्यक्तौ चैकत्र सा व्यक्त्याऽभेदात्सर्वत्रगा यदि ।
जातिर्दृश्येत सर्वत्रेति ।

मैवम् । समवायाख्यसम्बन्धविशेषस्य गोव्यक्तिभिरेव समं

स्वीकारात्। तत्र स्वभावस्यैव नियामकत्वात्। अत एव जीवानां व्यापकत्वे ऽप्यवच्छेदकत्वाख्यः सम्बन्धः शरीरविशेष एव स्वीक्रियते। अन्यथा सर्वशरीरावच्छेदेन सर्वेषां सुखादिसाक्षात्कारापत्तेः ।

यत्तु बौद्धाः—अपोह एव अतद्व्यावृत्तिरूपो जातिः। गोभिन्नभेदस्य गोमात्रे सत्त्वादतिरिक्तगोत्वे मानाभावादिति। तदसत्। गोभिन्नमित्यत्र यत्किञ्चिद्गोप्रतियोगिको भेदो निवेश्यते, गोत्वावच्छिन्नप्रतियोगिताको वा। नाद्यः। गोरपि यत्किञ्चिद्व्यापेक्षया भिन्नत्वात् । तद्भेदस्य घटे ऽपि वृत्त्या तत्रापि गौरिति प्रत्ययापत्तेः। नान्त्यः। अतिरिक्तगोत्वसिद्धेः। तदाहुः—

सिद्धश्चागौरपोद्येत गोनिषेधात्मकश्च सः।
तत्र गौरेव वक्तव्यो नञा यः प्रतिषिध्यते ॥ इति ।

क्रियाशब्दानामपि जातिवाचित्वमेव । गुडतण्डुलादिपाकव्यक्तिष्ववान्तरवैलक्षण्यसत्त्वे ऽपि पाकत्वस्य प्रत्यभिज्ञाबलात्सिद्धेः। भिन्नडित्थशब्दगतं यथा डित्थशब्दत्वं नाम तेष्वभिन्नप्रत्ययाभिधानहेतु तथा सोऽयमिति शब्दार्थयोरभेदाध्यवसायादध्यस्तडित्थशब्देषु संज्ञिष्वपि सम्बन्धादभिन्नप्रत्ययाभिधाननिमित्तम् ।

तथाच स्वाश्रयवाच्यत्वसम्बन्धेन व्यक्तिनिष्ठं डित्थशब्दत्वं तदर्थेषु प्रवृत्तिनिमित्तम् । वह्निमानित्यादौ स्वसमवायिसंयोगसम्बन्धेन वह्नित्वमिवेत्याशयः ।

तौ एतौ इत्यादौ च परोक्षत्वप्रत्यक्षत्वादिकम् ।

अभावाश्चत्वार इत्यत्रापि निरुपाख्यत्वं नाम सामान्यमाश्रयणीयम्। गोत्वाश्वत्वे सामान्ये इति व्यावृत्तेष्वनुवृत्तप्रत्ययहेतुत्वं सामान्यानामपि सामान्यमस्ति ।

अथवा निःसामान्यानि सामान्यानीति तार्किकदर्शनं वैयाकरणैर्न नियमत आस्थेयम् । कार्योन्नीयमाना हि तेषां पदार्था इति सामान्येष्वपि सामान्यमस्ति इति कैयटः । नचैवं सामान्येष्वपि सामान्यस्वीकारेऽनवस्थापत्तिरिति वाच्यम् । एकव्यक्तित्वरूपबाधकसत्त्वेन तत्र जातेरस्वीकारात् । यत्तु घटत्वादिजातिमादाय तस्याप्यनेकव्यक्तिकत्वमस्त्येवेति । तन्न । तत्साधारणजात्यन्तरस्वीकारे प्रयोजनाभावात् । सामान्यत्वजात्यैव तत्रानुवृत्तप्रतीत्युपपत्तेरिति दिक् ।

ननु जातौ पदार्थे द्वित्वादीनां कथमन्वयः तस्या एकत्वात् । मैवम् । एकाश्रयसम्बन्धविवक्षायामाकृतेरेकवचनम् । यथा "पशुना यजेत" इति । अनेकाश्रयसम्बन्धविवक्षायां तु द्विवचनबहुवचने । नहि जातिपदार्थवादिना व्यक्तेरनभिधेयत्वं स्वीक्रियते, किन्तु गुणभावमात्रम् । तत्र पचति पचतः पचन्तीत्यादौ क्रियाप्राधान्येऽपि साधनसंख्याकृतो वचनभेदः, एवमाकृतिप्राधान्येऽपि द्रव्यसंख्याकृतः इत्यदोषात् । नन्वेवमपि लिङ्गभेदो न स्यात् ब्राह्मणी ब्राह्मण इति । उक्तं हि "विशेषणानां चाजातेः" इत्यत्र "आविष्टलिङ्गा जातिः" इति । सर्वदाऽप्येकमेवाश्रयगतं लिङ्गमुपादत्ते इत्यर्थः । मैवम् । स्तनकेशादिसम्बन्धरूपस्य स्त्रीत्वादेर्लौकिकस्यात्र लिङ्गत्वेनानुपादानात् । तथा सति लिङ्गान्तरसम्बन्धायोगात् । किन्तु स्वसिद्धान्तव्यवस्था शाब्दिकैराश्रीयते । तथाहि सत्त्वरजस्तमःपरिणामरूपाणां शब्दादीनां वृद्धिह्रासमध्यस्थाऽवस्थाः शब्दैकगोचरा लिङ्गत्वेन परिगृह्यन्ते । गुणानां वृद्धिः पुंस्त्वम्, अपचयः स्त्रीत्वम्, स्थितिमात्रं नपुंसकत्वम् । अत एवोत्कर्षापकर्षसत्त्वेऽपि तदविवक्षया स्थितिमात्राभिप्रायेण "सामान्ये नपुंसकम्" इति शास्त्रं सङ्गच्छते । एतच्च

"स्त्रियाम्" इति सूत्रे प्रपञ्चयिष्यामः ।

वृद्धो यूना तल्लक्षणश्चेदेव विशेषः ६५ ।

अपत्यमन्तर्हितं वृद्धमिति पूर्वाचार्यपरिभाषया वृद्धपदं गोत्रपरं पारिभाषिकयुवपदसाहचर्यात् । युवप्रत्ययान्तेन सहोक्तौ गोत्रप्रत्ययान्तः शिष्यते उक्तप्रत्ययमात्रकृतं चेत्तयोः कृत्स्नं वैरूप्यम् । गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ । वृद्धेति किम् । गर्गश्च गार्ग्यायणश्च गर्गगार्ग्यायणौ । यूनेति किम् । गर्गश्च गार्ग्यश्च गर्गगार्ग्यौ । तल्लक्षणेति किम् । गार्ग्यश्च वात्स्यायनश्च गार्ग्यवात्स्यायनौ । कृत्स्नं किम् । भागवित्तिभागवित्तिकौ । भागवित्तशब्दाद्गोत्रापत्ये "अत इञ्" तस्माद्यून्यपत्ये "वृद्धाट्ठक् सौवीरेषु बहुलम्" इति ठक् । अत्र न केवलं प्रत्ययमात्रकृतं वैरूप्यं किन्तु कृत्सासौवीरगोत्रत्वकृतमपि । "गोत्रस्त्रियाः कुत्सने" इत्यतः "कुत्सने" इत्यस्यानुवृत्तेः । कृत्स्नं किम् । गार्ग्यश्च वात्स्यायनश्च गार्ग्यवात्स्यायनौ ।

स्त्री पुंवच्च ६६ ।

यूना सहोक्तौ वृद्धा स्त्री शिष्यते तदर्थश्च पुंवत् । स्त्रीत्वप्रयुक्तवैरूप्याधिक्यादप्राप्तावारम्भः । गार्गी च गार्ग्यायणौ च गर्गाः । "अस्त्रियाम्" इत्यनुवृत्तौ "यञञोश्च" इति लुक् दाक्षी च दाक्षायणश्च दाक्षी । इह स्त्रीशब्दस्य स्वरितत्वे तदधिकारीयप्रत्ययोपादाने पुंवत् स्त्रीप्रत्यय इति अभावातिदेशो वा, स्वरितत्वाभावे शब्दस्य-

ग्रहणं वा, अर्थग्रहणं वा। नाद्यः। उक्तस्थले गर्गा इत्यत्र यञः श्रवणापत्तेः। "अस्त्रियाम्" इति तल्लोपनिषेधात्। प्रसज्यप्रतिषेधे चायं दोषः। पर्युदासे तु स्त्रीसदृशार्थसत्त्वात् शिष्यमाणस्य लुप्यमानार्थाभिधायित्वात्। न द्वितीयः। स्त्रीत्वस्यानिवृत्त्या गर्गान्पश्येत्यत्र "तस्माच्छसो नः पुंसि" इति नत्वानुपपत्तेः। तस्मात् तृतीयः साधुः। पुमर्थातिदेशे तत्प्रयुक्तकार्यप्रवृत्तेः। एवमन्यत्रापि बोध्यम्।

पुमान्स्त्रिया ६७।

सरूपाणां मध्ये स्त्रिया सहोक्तौ पुमान् शिष्यते स च पुंवदेव तल्लक्षण एव चेद्विशेषः। हंसश्च हंसी च हंसौ। शिष्यमाणस्य लुप्यमानार्थाभिधायित्वेन स्त्रीत्वस्यापि सत्त्वेन टाप्प्राप्तः पुंवदेवेत्यनुवृत्तेर्न भवति। पदान्तरगम्ये ऽपि तल्लक्षणविशेषे ऽयमेकशेषः। यथा गौश्चायं गौश्चेयमित्येतौ गावौ चरत इति कैयटः। तादितरकृतविशेषविरहरूपे विशिष्टाभावे ऽस्य तात्पर्यम्। स चात्रापि विशेष्याभावादस्त्येवेति दीक्षिताः। पुमानिति योगविभागाद्विशेषाभावे ऽप्येकशेषः, शिष्टप्रयोगस्य नियामकत्वाच्च नातिप्रसङ्ग इति न्यासकारः। हंसत्वजातेः शक्यतावच्छेदकत्वसाम्याच्छब्दभेदस्य स्त्रीत्वमात्रलक्षणत्वे ऽपि हंसश्च वरटा च इत्यादौ नैकशेषः। सरूपानुवृत्त्या प्रकृतिसाम्यलाभात्।

भातृपुत्रौ स्वसृदुहितृभ्याम् ६८

भ्राता च स्वसा च भ्रातरौ। पुत्रश्च दुहिता च पुत्रौ। पूर्वसूत्रे सरूपपदानुवृत्तौ चैतदेव सूत्रं मानम्। अन्यथा ऽत्रापि तेनैव स्यात्।

"त्यदादीनि सर्वैः" इत्यत्र तु न तदनुवृत्तिर्बाधितत्वात् । अत्र भाष्यम् गार्ग्यश्च गार्ग्यायणश्चेत्यत्र वृद्धयूनोर्यदेकं गर्गापत्यत्वरूपं सामान्यं तस्यैव विवक्षितत्वात् सिद्धं गार्ग्याविति । वृद्धयूनोरत्रोपादानं किं वा वृद्धयोरेवेति विशेषावधारणार्थम् एकशेषारम्भपक्षेऽपि प्रकरणादेरेवापेक्षणीयत्वात् सामान्योपादाने ऽपि तेनैव विशेषनिर्णयसंभवात् ।

न च द्वन्द्ववारणार्थमेकशेषारम्भः । अनभिधानादेव तन्निवृत्तेः । स्त्रीपुंसयोरपि मृगक्षीरादिवज्जातिमात्रविवक्षायां ब्राह्मणाविति सिद्धम् ।

स्यादेतत् । ब्राह्मणवत्सा च ब्राह्मणीवत्सश्चेत्यत्र "पुमान्स्त्रिया" इत्येकशेषप्रसङ्गः।यत्रैका प्रत्ययप्रकृतिरन्यत्तु वैरूप्यम्, तादृशविषयस्य सत्त्वात्। नच "एकविभक्तौ" इत्यनुवृत्त्या एकशेषनिमित्ते विभक्तौ परतो यत्र स्त्रीपुंसकृतो विशेषस्तत्रैकशेषः इह तु पूर्वपदविभक्तावपि स्त्रीपुंसकृतविशेषसत्त्वान्नेति वाच्यम् । कारकश्च कारिकाच कारकावित्येकशेषानापत्तेः । इत्वं ह्यत्र स्त्रीत्वकृतो विशेषस्तस्य चैकशेषनिमित्तविभक्तिमपेक्ष्य पूर्वत्वाभावात् । नच इत्वस्य स्त्रीप्रत्ययकृतविशेषरूपत्वे ऽपि स्त्रीत्वरूपार्थकृतविशेषत्वं नास्तीति वाच्यम् । तथा सति गोमांश्च गोमती च गोमन्तावित्यसिद्धेः । स्त्रीप्रत्ययेनात्र विशेषान्तरानाधानात् । स्त्रीत्वरूपार्थेन तु प्रत्ययरूपस्यैव विशेषस्योक्तत्वात् । तथाच क्वचिदर्थाहितस्य क्वचिच स्त्रीप्रत्ययाहितस्य विशेषस्यावश्यं ग्राह्यत्वात् । नच पक्षद्वये ऽपि पटुश्च पट्वीच पटू इत्यादावेकशेषो न स्यात्, यणादेशे स्त्रीत्वस्त्रीप्रत्ययान्यतरस्यापि निमित्तत्वाभावात्, अज्रूपत्वमेवाश्रित्य यणो विहितत्वादिति वाच्यम् । तद्भावभावितामात्रेण स्त्रीप्रत्ययस्य परंपरया च

स्त्रीत्वस्य यणादेशे निमित्तत्वात्, एवं इत्वेऽपीति ब्राह्मणवत्सा चेत्यादावेकशेषो दुर्वार इति ।

मैवम् । तत्पदस्यानुवृत्त्या प्रधानयोरेव स्त्रीपुंसयोर्ग्रहणात् । सहविवक्षायां चैकशेषविधानात् । तस्याश्च प्रधानमात्रविषयकत्वात् यत्र प्रधानस्त्रीपुंसकृतो विशेषस्तत्रैकशेषः अत्र त्वप्रधानस्त्रीपुंसकृतस्यापि विशेषस्य सत्त्वादिति ।

नपुंसकमनपुंसकेनैकवच्चा-स्यान्यतरस्याम् ६९ ।

अक्लीवेन सहोक्तौ क्लीवं शिष्यते तच्चैकवद्वा तल्लक्षण एव चेद्विशेषः । शुक्लश्च कंबलः शुक्लं च वस्त्रं तदिदं शुक्लं ते इमे शुक्ले । शुक्लः कंबलः शुक्ला बृहतिका शुक्लं वस्त्रं च तदिदं शुक्लं तानीमानि शुक्लानि ।

अत्र भाष्यं स्थितिमात्रविवक्षायां औत्सर्गिकं नपुंसकमेव सिद्धम् । न च पाक्षिकैकवद्भावार्थं सूत्रम् । जातिप्राधान्यविवक्षयैव सिद्धेः ।

पिता मात्रा ७०

स्पष्टम् । वेत्यनुवर्तते । पिता च माता च पितरौ मातापितरौ । दौहित्राभावे पितरौ धनभाजावित्येतद्व्याख्याने—यद्यपि युगपदधिकरणवचनतायां द्वन्द्वस्मरणात्तदपवादत्वादेकशेषस्य धनग्रहणे पित्रोः क्रमो न प्रतीयते तथापि विग्रहवाक्ये पूर्वनिपातादेकशेषाभावपक्षे च मातापितराविति मातृशब्दस्य पूर्वं श्रवणात्पाठक्रमेणार्थक्रमावगमाद्धनसम्बन्धे ऽपि क्र-

मापेक्षायां प्रतीतक्रमानुरोधेनैव प्रथमं माता धनभाक्, तदभावे पितेति गम्यते इति विज्ञानेश्वरः ।

एतेन जगतः पितरौ वन्दे इत्यपि व्याख्यातम् । योग्यतादिप्रमाणान्तरवशान्निर्णय इति पर्यवसानात् ।

एतेन भवानपि त्वद्दयिताच शेषे सायुज्यमासादयतं शिवाभ्यामिति विषयान्तरमपि व्याख्यातम् । स्त्रीलिङ्गस्य विग्रहवाक्ये पूर्वप्रयोगनियमे मानाभावात् । "उष्ट्री च करभश्च, हंसश्च वरटा चेत्यादौ कस्मान्न भवति" इति भाष्यदर्शनात् ।

श्वशुरः श्वश्रूश्च ७१

स्पष्टम् । श्वशुरौ श्वश्रूश्वशुरौ । सूत्रत्रयमधिकृत्य भाष्यम्—वृत्तिविषये भ्रात्रादिशब्दानां स्वस्रादिबोधकत्वं तावदेकशेषारम्भेऽपि स्वीकार्यम्, शिष्यमाणं लुप्यमानार्थाभिधायीति सिद्धान्तात्, तद्वरम् एकशेषं विनाऽपि शब्दार्थसम्बन्धस्य नित्यत्वात्सहविवक्षायामेव तथात्वं स्वीक्रियताम्; अनभिधानाच्च भ्रातृस्वसृशब्दयोर्न द्वन्द्वः; मातापितरौ श्वश्रूश्वशुरावित्यत्र च द्वन्द्वस्य वाशब्दानुवृत्त्या त्वयाऽपि स्वीकारात्; किमयं सरूपयोरेकशेष उत विरूपयोरित्यवधारणार्थं प्रकरणादेर्नियामकत्वस्य वाच्यत्वाच्चेति । 'श्यालः स्वस्रोरथाग्रहीद्' इति भागवते तु स्वसृपदं "प्राणभृदुपदधाति" इतिवल्लिङ्गसमवायेन स्वसृतत्पत्योर्लाक्षणिकम् । नचोभयोः साम्यादल्पत्वानुपपत्तिः, तत्र प्राणपदगर्भमन्त्रस्य तद्रहितमन्त्रापेक्षया ऽल्पत्वात् इति वाच्यम् । लक्ष्यापेक्षया शक्यानां बहुत्वाभावमात्रस्य तत्र विवक्षितत्वात् इति श्रीधरः ।

त्यदादीनि सर्वैर्नित्यम् ७२।

स्वभिन्नैः सर्वैः सहोक्तौ त्यदादीनि नित्यं शिष्यन्ते। स च देवदत्तश्च तौ।

"त्यदादितः शेषे पुन्नपुंसकतो लिङ्गवचनानीति वक्तव्यम्"।

सा च देवदत्तश्च तौ। सा च कुण्डेच तानि। शिष्यमाणत्वात्त्यदादिलिङ्गे प्राप्ते आरम्भः। पुंनपुंसकयोस्त्वेकशेषे शब्दपरविप्रतिषेधान्नपुंसकशेषः। तच्च देवदत्तश्च ते।

"अद्वन्द्वतत्पुरुषविशेषणानामिति च वक्तव्यम्"।

स च कुक्कुटः सा च मयूरी कुक्कुटमयूर्यौ ते। तच्च साच अर्द्धपिप्पल्यौ ते।

न्यायसिद्धं चेदम्। "परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः" इति समासार्थस्य लिङ्गातिदेशात्तद्विशेषणस्य सर्वनाम्नस्तल्लिङ्गत्वसिद्धेरिति कैयटः। त्यदादीनां सर्वनामतया वस्तुमात्रपरामर्शकत्वात्पदान्तरेण सहोक्तौ तेषामेव शेषो न्यायसिद्ध इति नेदमारभ्यम्। नच त्यदादीनां यत्परं तच्छिष्यते इत्येतदर्थं सूत्रम्, तद्विना शब्दपरविप्रतिषेधालाभादिति वाच्यम्। सच यश्च तावानय यावानयेति पूर्वशेषस्यापीष्टत्वात्। सूत्रारम्भपक्षे च तदसिद्धेः। नापि तद्देवदत्ताविति प्रयोगवारणार्थम्। "सामान्यविशेषवाचिनोर्न द्वन्द्वः" इति वचनस्यावश्यकत्वात्। नचैवं शूद्राभीरम्, गोवलीवर्दम्, तृणोलपम्, इति न स्यादिति वाच्यम्। आभीराणां जात्यन्तरत्वात्। ब्राह्मणादुग्रकन्यायामाभीरो नाम जायते।

माहिष्योग्रौ प्रजायेते विट्शूद्राङ्गनयोर्नृपाद् ॥ इति—

स्मृतेः। गोशब्दस्य च स्त्रीगवीमात्रवाचकत्वात् वृषभे शक्त्यन्तरस्वीकारात्। न च सामान्यपदेन विशेषार्थस्यापि प्र-

तीतिसिद्धेः न द्वन्द्वप्रसक्तिरिति वाच्यम् । तं ब्राह्मणमानय गार्ग्यमिति प्रयोगदर्शनात् । विशेषणविशेष्यभाववद् विशेष्यसन्निधौ सामान्यशब्दस्य तदितरविशेषपरत्वस्यापि ब्राह्मणा आगता वसिष्ठो ऽप्यागत इत्यादौ दर्शनात् । तस्मात्सामान्यविशेषयोर्द्वन्द्ववचनस्यावश्यकत्वात्तत एव सिद्धौ नैतत्सूत्रमारभ्यमिति भाष्यम् ।

ग्राम्यपशुसङ्घेष्वतरुणेषु स्त्री ७३।

पुमान्स्त्रियेत्यस्यापवादः । एषु सहविवक्षायां स्त्री शिष्यते । गाव इमाः । अजा इमाः । ग्राम्येति किम् । न्यङ्कव इमे । सूकरा इमे । पश्विति किम् । ब्राह्मणा इमे । सङ्घेति किम् । एतौ गावौ । संघे गुणत्वानुपपत्त्या तद्घटकनिष्ठं तद्ग्राह्यम्, अवयवसङ्गसम्भवे ऽपि सङ्घपदग्रहणसामर्थ्यादनेकघटितस्यैव विवक्षितत्वात् । अतरुणेति किम् । तरुणका इमे । वर्करा इमे । संघे तरुणत्वतदभावयोरन्वयानुपयोगात्संघघटकपशुव्यक्तिनिष्ठयोस्तयोरुपादानं सामर्थ्यात् । "अनेकशफेष्वति वाच्यम्" । नेह अश्वा इमे । उष्ट्रा इमे । विकल्पानुवृत्त्या व्यवस्थितत्वाच्चेदमिति न्यासकृत् ।

अत्रापि भाष्यम्–नैतदारभ्यम् । सङ्घेषु स्त्रीगवीनामेव बाहुल्यान्मल्लग्रामादिवद् भूयस्त्वेन व्यपदेशादेव स्त्रीशेषसिद्धेः, अग्राम्येषु तु पुंसामेव प्राधान्यात्, उष्ट्राणां तु आरण्यकत्वेन सूत्रारम्भेऽपि स्त्रीशेषत्वाभावात् । ब्राह्मणा इत्यादावपि पुंसामेव प्राधान्यात् । एतावित्यादौच निर्ज्ञाते लिङ्गविशेषे पुंस एव शेषात्, वत्सा इमे इत्यादावपि पुंसामेव प्राधान्यादिति ।

इति श्रीसिद्धान्तसुधानिधौ प्रथमस्य द्वितीये तृतीयमाह्निकम्
पादश्चायं समाप्तः ॥

अथ प्रथमाध्यायस्य तृतीयः पादः ।

भूवादयो धातवः १।

क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युः । भवति । धातुत्वाल्लडादयः । याः पश्यसीत्यादौ धातुसंज्ञायां या इत्यादेरातो लोपस्य वारणाय क्रियावचना इति । हिरुक् इत्यादौ वर्जयित्वेत्याद्यर्थके निपाते, शिश्ये इत्यादौ भावतिङन्ते चातिव्याप्तिवारणाय भ्वादय इति गणपठिता इत्यर्थकम् । नच लाक्षणिकत्वादेव याशब्दस्य गणे ऽनुपादानमिति वाच्यम् । स्थलान्तरे प्रतिपदोक्तत्वस्य तत्रापेक्षितत्वात् । नचान्तरङ्गे लोपे ऽर्थनिमित्तकतया बहिरङ्गस्य टापोऽ सिद्धत्वम् । लिङ्गस्य कारकापेक्षया प्रथमप्रतीतिकत्वेन अजादिप्रत्ययनिमित्तकस्य लोपस्यैव बहिरङ्गत्वात् । 'नाजानन्तर्ये'इति निषेध इत्यपि केचित् ।

नचार्थनिर्देशो नियामकः । तस्याभियुक्तान्तरकृतत्वेनापाणिनीयत्वात् ।

क्रियावाचित्वमाख्यातुमेकैकोऽर्थः प्रदर्शितः ।
प्रयोगतो ऽनुसर्त्तव्या अनेकार्था हि धातवः ॥
इत्यर्थान्तरव्यावृत्तौ तात्पर्याभावाच्च ।

अत एव "कुर्द खुर्द गुर्द गुद क्रीडायामेव" इत्येवकारः । "श्लिष आलिङ्गने"इत्यादिकं च सङ्गच्छते । नचैवं "टुवम् उद्गिरणे" इति निपातनादित्त्वमित्यस्यानुपपत्तिः । एतदपरितोषादेव पृषोदरादित्वस्यान्यैरुक्तत्वात् ।

भूवादय इति निपातनाद्वकारागमः । नचासाधुत्वम् । वैयाकरणनिकाये प्रसिद्धत्वात् । नच क्रियावचनत्वस्य

सूत्रादलाभः । भवनं भूः क्रियासामान्यं तद् वदन्तीति भू-वादय इत्यर्थात् । "वसिवपियजिराजित्रजिसहिहनिवासिवादिवारिभ्य इञ्" इत्यत्र इञो वादयतेर्विधाने ऽपि बाहुलकाद्वदेरपि तत्सम्भवादिति केचित् ।

वादयतेरेवात्र इञ् निवृत्तप्रेषणतयाऽर्थभेदाभावात् । वदन्तीतिभाष्यस्य चार्थकथनपरत्वादित्यन्ये ।

नचैवं गणपठितत्वस्य दौर्लभ्यम् । "सनाद्यन्ता धातवः" इत्यस्यारम्भेण पठितानामेव संज्ञाऽनुमानात् । सौत्राणां तु स्तम्भ्वादीनामुदित्करणेन धात्वधिकारीयकार्यविधानेन च धातुत्वसिद्धेः । चुलुम्पादीनां च भ्वादेराकृतिगणत्वात् । वृत्करणस्य यजादिसमाप्त्यर्थत्वात् ।

एतेन दिवाद्यन्ते वृत्करणं पुषादिसमाप्त्यर्थम्, तेन मृग्यतीत्यादिकमपि व्याख्यातम् ।

वस्तुतो "बहुलमेतन्निदर्शनम्" इति चुराद्यन्ते गणसूत्रेण सर्वसिद्धिः । भ्वादिभ्योऽपि स्वार्थे णिच् ।

यद्वा दशगणीपाठो दिङ्मात्रम्, शिष्टप्रयोगादन्ये ऽपि धातवो ज्ञेया इति द्वेधा तस्य ग्रन्थकृद्भिर्व्याख्यानात् ।

यद्वा भूश्च वाश्चेति द्वन्द्वः । आदिशब्दयोर्व्यवस्थाप्रकारवाचिनोरेकशेषः । भूवौ आदी येषामिति बहुव्रीहिः । सादृश्यं च क्रियावाचित्वेनेति यथोक्तविशेषणद्वयलाभः । नच वातेर्धातुत्वानापत्तिः । भेदाघटितसादृश्यस्य तत्र सत्त्वात् ।

यद्वा वादय इत्यत्र बहुव्रीहितत्पुरुषयोरेकशेषः । "स्वरभिन्नानां यत्परं तच्छिष्यते" इति बहुव्रीहेः शेषः । भुवो वादय इति षष्ठीसमासः । वाच्यवाचकभावश्च षष्ठ्यर्थः ।

यद्वा तन्त्रावृत्त्यादिना उभयलाभः, "द्विर्वचनेऽचि" इत्यादिवत्। अत्र भूप्रभृतयो वासदृशा इत्येव सारम्।

एतेन—

भूवादीनां वकारोऽयं मङ्गलार्थः प्रयुज्यते।
भुवो वार्थं वदन्तीति भ्वर्था वा वादयः स्मृताः॥ इति—

वार्त्तिकं व्याख्यातम्।

वस्तुतस्त्वभियुक्तानां परिभाषाविशेषसम्बन्धेन धातुपदवत्त्वमेव धातुत्वम्। तत्परिचायकं चोक्तसूत्रम्। नतु भ्वाद्यन्यतमत्वम्, गौरवात्। अनुकरणेषु तत्तद्रूपाणामतिप्रसङ्गाच्च। तच्चावृत्तस्य भूत्वादेरन्यतमत्वघटकस्य प्रकारान्तरेण दुर्वचत्वात्। अत एव सौत्राणाम्, चुलुम्पादीनां च सङ्ग्रहः। अत एव च धात्वर्थत्वं क्रियात्वमिति तान्त्रिकाणामुद्घोषः सङ्गच्छते।

अथ केयं क्रियानाम? यत्त्वाहुः फलाव्यवहितपूर्वकालवर्ती व्यापारविशेषस्तथा। अधिश्रयणादीनां तु क्रियात्वमौपचारिकम्।

तदुक्तम्—

अनन्तरं फलं यस्याः कल्पते तां क्रियां विदुः।
प्रधानभूतां तादर्थ्यादन्यासां तु तदाख्यया॥ इति।

नच काष्ठादिव्यापारस्य तथात्वाद्व्यभिचारः। जनकान्तराननुकूलत्वस्य वाच्यत्वात्। नापि पाकारम्भेऽपि क्रियाया भावित्वात्पक्ष्यतीत्यस्यापत्तिः। गौणमुख्यसाधारणतत्क्रियासमूहस्यातीतत्वे ऽपाक्षीदिति, प्रागभावे पक्ष्यतीति, यत्किञ्चित्सत्त्वे च पचतीति प्रयोग इति व्यवस्थाऽभ्युपगमात्। इदंच यङ्क्विधौ भाष्ये स्पष्टम्।

तन्न । मुख्यत्वसम्भवे गौणत्वस्यानुचितत्वात् ।

अथ पचित्वं जातिः,पचतीत्यनुगतव्यवहारात्, सैव क्रिया । नचैवमसाध्यत्वापत्तिः । तदाश्रयव्यक्तीनामेव तथात्वात् ।

तदुक्तम्—

जातिमन्ये क्रियामाहुरनेकव्यक्तिवर्त्तिनीम् ।
असाध्या व्यक्तिरूपेण सा साध्येवावभासते ॥ इति ।

तन्न । दण्डादिव्यापारस्यापि फलानुकूलत्वेन तदाश्रयस्य दण्डस्य कर्तृत्वे तिङा तदभिधानापत्त्या दण्डेन देवदत्तः पचतीत्यत्र दण्डेऽपि प्रथमापत्तेः । नच करणार्थेयं तृतीया । कर्तृत्वे करणत्वस्यानुपपत्तेः । "आकडारादेका संज्ञा"इति नियमात् । न च तदा दण्डादिव्यापारस्य धात्वर्थत्वेनाविवक्षितत्वान्न दोष इति वाच्यम् । तथाऽपि क्रियायाः साध्यत्वप्रत्ययस्यान्याविषयकत्वे मानाभावात् ।

अथ साध्यत्वेनाभिधीयमानो व्यापारविशेषः क्रिया । तदुक्तम्—

यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते ।
आश्रितक्रमरूपत्वात्सा क्रियेत्यभिधीयते ॥ इति ।

नच साध्यत्वेनाभिधाने मानाभावः, पचति, पाकः, करोति, कृतिरित्यादौ धात्वर्थप्रतीत्यविशेषे ऽपि क्रियान्तराकाङ्क्षानाकाङ्क्षयोर्दर्शनस्य मानत्वात् । तथाच क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकत्वं साध्यत्वम् । तदेवासत्त्वभूतत्वम् । क्रियायाः प्रत्ययार्थतावादे ऽपि पचति पाकभवनेत्यादौ तथा दर्शनात्तथात्वावश्यकत्वादिति ।

तन्न । साध्यत्वप्रकारकशाब्दबोधस्य सर्वानुभवविरुद्ध-

त्वात् । भोक्तुमित्यादावसत्त्वभूता क्रिया भासते इति सिद्धान्तविरोधाच्च । क्रियान्तराकाङ्क्षायास्तत्र सत्त्वात् इति तृतीये वक्ष्यते इति चेत् ।

अत्रोच्यते । फलानुकूलो व्यापारसमूह एव क्रिया । तदुक्तं भाष्ये "क्रिया नामेयमत्यन्तापरिदृष्टा पूर्वापरीभूतावयवा न शक्या पिण्डीभूता निदर्शयितुम्" इति । व्यापारसमूहघटकानामवयवानामेकक्षणानवच्छिन्नतया प्रत्यक्षासम्भवादित्यर्थः ।

तथा च वाक्यपदीये—

गुणभूतैरवयवैः समूहः क्रमजन्मनाम् ।
बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यते ॥

युगपदनवस्थाने हेतुः क्रमजन्मनामिति । बुद्ध्या तावद्विषयकसमूहालम्बनज्ञानेन । प्रकल्पितः अभेदो यस्य । तथा चानेकवर्णसमुदाये एकज्ञानावच्छिन्नतया यथैकं पदमिति व्यवहारस्तथोक्तस्थले क्रियाया अपीत्यर्थः । पिण्डीभूतेति । यथा परमाणवः पिण्डीभूता उपलभ्यन्ते न केवलाः एवं पिण्डीभावात् क्रिया न प्रत्यक्षेति कैयटः ।

काव्यप्रकाशकारेणाप्युक्तम्—

साध्यः पूर्वापरीभूतावयवः क्रियारूप इति । तद्व्याख्यातारोऽपि—साध्यः साध्यत्वेन विवक्षितः पूर्वापरीभूतत्वेन प्रतीयमाना अवयवाः प्रचयान्तर्गताः प्रचयिनोऽधिश्रयणादयो यस्य पाकादिधात्वर्थस्य सः । अक्रमस्य क्रमप्राप्तिशून्यर्थः । प्रचयस्य तत्तत्प्रत्येकातिरिक्तस्याभावाद्व्यापाराणां प्रत्येकं पाकत्वेन क्रमेण पाक इति भ्रम एवेति । अत एवोक्तमाश्रित्यक्रमरूपत्वात् इति ।

यद्वा अधिश्रयणादिरपि तत्तदाश्रयविशिष्टः क्रियारूपः, क्रियाया विशेष्यस्य चैकत्वाद् अक्रमत्वे ऽपि आश्रयीभूतविशेषणक्रमात्क्रमोपचारः ।

अन्ये तु स्थालीन्धनतण्डुलादिविशिष्टक्रिया पचादिधात्वर्थः, तदवयवाश्च स्वनिष्ठशक्त्यवच्छेदकत्वे सति स्वाश्रयाः स्थाल्यादयः, तेषां वास्तवपौर्वापर्याभावाच्चिन्त्वप्रत्यय इत्याहुः ।

नच यत्र चुल्ल्युपरिधारणादयो ऽवतारणपर्यन्ता व्यापाराः पुरुषभेदेन नानापाकक्रियासु युगपद्भवन्ति तदा पाकक्रियाप्रत्यक्षं स्यादिति वाच्यम् । तद्व्यक्तीनां परस्परसहकारित्वाभावात् ।

ननु पाकत्वं प्रत्येकव्यापारपर्याप्तम्, नतु संयोगादिवद्व्यासज्यवृत्ति भिन्नकालीनेषु एकस्य व्यासज्यत्वानुपपत्तेः, उक्तग्रन्थान्तरेभ्योऽपि तथाप्रतीतेश्च ।

शब्दकण्टकोद्धारे ऽप्युक्तम्—चुल्लीज्वालनमारभ्यावतारणपर्यन्तव्यापारकलापे घटत्वादिवत् प्रत्येकपर्याप्तमेव पाकत्वं भावनात्वं वा आख्यातार्थो वा, फलावच्छिन्नव्यापारसमुदायस्य तदर्थत्वात् । उक्तं च भाष्ये—"नाना चैकार्था क्रिया पचतीति स्थाल्यधिश्रयणमुदकावसेचनं तण्डुलावपनमेधोऽपकर्षणमग्निज्वालनं दर्वीघट्टनमवतारणम्" इति, तथाच पाकप्रत्यक्षं स्यादेवेति चेन्न ।

पाकत्वस्य वस्तुतस्तथात्वेऽपि तत्समूहस्यैव क्रियाव्यवहारविषयत्वात् । तस्य च प्रत्यक्षायोगात् । अत एव पश्य मृगो धावतीत्यादावेकदेशस्यैव वर्त्तमानस्य दर्शनकर्मत्वमिति तृतीये वक्ष्यते । तदुक्तं हरिणा—

क्रमात्सदसतां तेषामात्मानो न समूहिनाम् ।
सद्वस्तुविषयैर्यान्ति सबन्धं चक्षुरादिभिः ॥

न यान्तीत्वन्वयः । क्रमिकव्यापारसमुदायस्य क्रियात्वात्तस्य वर्त्तमानत्वासम्भवान्न चक्षुरादिग्राह्यत्वम् । वर्त्तमानस्य तदेकदेशभूतस्य व्यापारस्य चाक्षुषत्वं तूपपन्नमेवेत्यर्थः । तत्सिद्धं क्रिया धात्वर्थ इति ।

अथोक्तरूपक्रियाया धात्वर्थत्वे किं मानम् ? । न तावद् "भावप्रधानमाख्यातम्" इति निरुक्तम् । आख्यातशब्दस्य धातावशक्तत्वात् । ननु 'सर्वमाख्यातजं नाम' इति निरुक्तकृताऽभिधानात्तस्य धातुवाचकत्वम् । प्रत्ययजन्यत्वस्य नामत्वसम्भवात् । "नाम च धातुजमाह निरुक्ते, व्याकरणे शकटस्य च तोकम्" इति भाष्योक्तेश्च । शकटस्य ऋषेस्तोकमपत्यमिति कैयटः । शाकटायन इति यावत् ।

तथाच निरुक्तम्—तत्र "नामान्याख्यातजानीति शाकटायनो नैरुक्तसमयश्च" इतीति चेत् ।

मैवम् । कृदन्ते धातावाख्यातपदप्रयोगाभावात् । तत्र लक्षणया तदुपपत्तेः । अत एव "येषां तूत्पत्तावर्थे स्वे प्रयोगो न विद्यते ताम्याख्यातानि" इतिजैमिनिसूत्रे ऽपि लक्षणयैवाख्यातपदं धातुपरम् । उत्पत्तावुच्चारणकाले स्वे ऽर्थे प्रयोगो न विद्यते, स्वार्थसिद्धो न विद्यते इति यावत् ।

अयं तु विशेषः—जैमिनिसूत्रे तेन तिङन्तस्यैव धातोर्ग्रहणम्, निरुक्ते तु आख्यातपदस्योपलक्षणतया धातुस्वरूपमात्रस्येति । नापि भावपदस्य भावनापरत्वम् ।

धात्वर्थः केवलः शुद्धो भाव इत्यभिधीयते । इति—

वैयाकरणैः परिभाषितत्वे ऽपि निरुक्तस्मृतौ आख्यातार्थभावनाया एव ग्रहणात् । तस्य व्याकरणमात्रपरत्वात् । तत्रापि "नपुंसके भावे क्तः" इत्यादावेव तथा, ननु "तस्य

भावस्त्वतलौ"इत्यादाविति स्पष्टम् । किञ्च भावनाया धात्वर्थत्वे मुख्यविशेष्यत्वं न स्यात्, प्रत्ययार्थप्राधान्यभङ्गापत्तेः । क्वचित्तत्परित्यागे ऽपि उत्सर्गे पक्षपातस्य युक्तत्वात् । नच भावनायास्तिङर्थत्वे कृदन्तेषु तत्प्रतीतिर्न स्यादिति वाच्यम् । धात्वर्थकारकैस्तत्सिद्धेः ।

तदुक्तम्—

धात्वर्थकारकैरेव गुणभूतो ऽवगम्यते ।
भावनात्मा कृदन्तेषु तस्मान्नैवाभिधीयते ॥

अत एव भावनाप्रधानत्वादाख्यातेषु तत्सम्बन्धादेव गुणभूतकारकप्रतीतिसिद्धेर्न कर्तृकर्मणोरभिधानम् । नच स्वार्थफलव्यधिकरणव्यापारवाचित्वरूपसकर्मकत्वानिर्वचनानुपपत्तिः। तत्र हि वस्तुतः फलव्यधिकरणो यो व्यापारस्तद्वाचित्वं सकर्मकत्वम्, उत फलव्यधिकरणत्वेन व्यापारवाचकत्वम् । नाद्यः । पच्यादेरपि फलाविवक्षायामकर्मकत्वाङ्गीकारात् । तत्र वस्तुतः फलव्यधिकरणत्वस्याभावात् । नान्त्यः । अनुभवविरोधात् । नच सर्वदाऽकर्मकस्यैव वारणीयत्वान्न पूर्वोक्तातिव्याप्तिरिति । तादृशाकर्मकादिलक्षणस्यानुपयुक्तत्वात् । "लः कर्मणि भावे चाकर्मकेभ्यः" इत्यकर्मकग्रहणेनाविवक्षितकर्मकाणामपि ग्रहणस्येष्टत्वात् । 'नेह पच्यते' इत्यादौ भावलकार इति हरदत्तादिभिरुक्तत्वात् । 'पीता गावो' 'भुक्ता ब्राह्मणाः' 'कृतपूर्वी कटम्' 'गतं तिरश्चीनम्' इत्यादौ ग्रन्थकारैर्भावे क्तप्रत्ययव्याख्यानाच्च । ननु गतिबुद्ध्यादिसूत्रे गत्यर्थाकर्मकेति सूत्रेच अविद्यमानकर्मकाणामेव ग्रहणं देवदत्तेन पाचयतीति तृतीयानुरोधात्, दत्तवान्पक्वानित्यर्थे दत्तः पक्व इत्यादेरापत्तेश्चेति चेत् । तर्हि तदननुगमतादवस्थ्यम्, तस्मादविवक्षाविरहविशि-

ष्टकर्मसाकाङ्क्षधातुत्वमेव सकर्मकत्वं तदभावश्चाकर्मकत्वम् । पच्यादीनां स्वरूपेण कर्मसाकाङ्क्षत्वे ऽप्यविवक्षादशायामकर्मकत्वादविवक्षाविरहेति ।

एतेन कृञो यत्नार्थकत्वेयतिवदकर्मकत्वापत्तिरिति निरस्तम्।

तथाहि—आकाङ्क्षा समभिव्याहारात्मिका शब्दधर्मः । तेनार्थैक्येऽपि घटः कर्मत्वमित्यादावनाकाङ्क्षत्वम् । घटमित्यादौ च साकाङ्क्षत्वम्, तद्वदेव यतेः कर्मानाकाङ्क्षा कृञश्च तदाकाङ्क्षेत्युपपत्तेः । आस्यादिधातूनां च स्वरूपेण अकर्मकत्वे ऽपि मासादिकालयोगे तदाकाङ्क्षत्वात्सकर्मकत्वम् । अत एवैकस्यैव ग्रन्थधातोश्चैत्रनिष्ठव्यापारमादाय सकर्मकत्वं पुष्पनिष्ठव्यापारमादाय त्वकर्मकत्वमित्यभ्युपगमः ।

अथ भावयति घटमितिवद्भवति घटमित्यपि स्यात् । दृष्टान्ते णिचा दार्ष्टान्तिके चाख्यातेन व्यापारबोधाविशेषात् । नच प्रयोजकव्यापारो णिजर्थः, कर्तृव्यापारस्त्वाख्यातार्थ इति विशेष इति वाच्यम् । त्वद्रीत्या कारकचक्रप्रयोक्तुरेव कर्तृत्वेन घटस्यातथात्वात् । नच यस्यैवान्यापेक्षयाऽऽख्यातोपात्तव्यापारसमवायः स कर्ता इति बाधाध्याये व्यवस्थितत्वाददोष इति वाच्यम् ।

करोतिः क्रियमाणेन न कश्चित्कर्मणा विना ।
भवत्यर्थस्य कर्ता च करोतेः कर्म जायते ॥
करोत्यर्थस्य यः कर्ता भवितुः स प्रयोजकः ।
भविता तमपेक्ष्याऽथ प्रयोज्यत्वं प्रपद्यते ॥
तेन भूतिषु कर्तृत्वं प्रतिपन्नस्य वस्तुनः ।
प्रयोजकक्रियामाहुर्भावनां भावनाविदः ॥ इति ।

भावार्थाधिकरणे भट्टपादैर्भावनाया निरूपितत्वात् तदना-

श्रयस्य कर्तृत्वानुपपत्तेः । नच धातूपात्तव्यापाराश्रयत्वमेव कर्तृत्वमिति वाच्यम् ! व्यापारस्य धात्वर्थत्वसिद्धौ भावनायास्तिङर्थत्वानुपपत्तेरिति चेन्न ।

अनुकूलव्यापारे शक्तिपक्षे हि अनुकूलत्वं जनकत्वम् प्रयोजकसाधारणं वा । नाद्यः । फलजनकशरीरगतक्रियाविशेषोपक्षीणस्यात्मनिष्ठप्रयत्नादेरन्यथासिद्धस्याऽसङ्ग्रहापत्तेः । नान्त्यः । कृष्यादिसाधारण्यात् । नच यत्नत्वाधःसन्तापनत्वादीनां तत्तद्रूपेण शक्यतावच्छेदकत्वाङ्गीकारान्नातिप्रसङ्गः । तथापि पचति पाके यतते इत्यादिविवरणाद्यत्नादीनां धात्वर्थवहिर्भावस्य दुर्वारत्वात् । नच यज्ञादियोगे धातोः फलमात्रमर्थः । सामान्यसामग्रीमर्यादया तद्बोधापत्तेः । यज्ञादिसमभिव्याहारस्य तत्प्रतिबन्धकत्वे गौरवात् । तिवादिसमभिव्याहृतधातुत्वस्य शक्तावच्छेदकत्वे कार्यकारणभावद्वयमवच्छेदकगौरवं तत्र व्यापारबोधानुभवविरोधश्च । स्तोकं पाक इत्यस्योपपादनविरोधश्च । नच तत्र विवक्षाविरहादेव यत्नवहिर्भावः । देवदत्तः पचतीत्यत्र विवक्षाध्रौव्यात् । अन्यथा तस्य कर्तृत्वानुपपत्तेः । धातूपात्तव्यापारवत एव त्वन्मते तत्त्वात् । अत पचतीत्यत्र भासमानो यत्नो ऽवश्यं पच्यर्थाद्बहिः कार्यः । स एवाख्यातार्थः । विवरणवेलायां भासमानस्य तस्य परिशेषादाख्यातवाच्यत्वकल्पनात् । तत्रापि रथो गच्छतीत्यादेरनुरोधादनुकूलव्यापारवाचिणिजन्तभूधातुना विवरणात्, सङ्ग्राहकलाघवाच्चानुकूलव्यापारे एव शक्तिः, यत्नस्यापि तद्रूपेण सङ्ग्रहादिति मीमांसकाः ।

मण्डनमिश्रानुयायिनस्तु—फलमात्रं धात्वर्थः, अनुकूलव्यापारो व्यापारमात्रं वा ऽऽख्यातार्थः । जन्यजनकभावः संसर्गलभ्यः । लडाद्यर्थो वर्त्तमानत्वादि लिङर्थश्चेष्टसाधनत्वादि व्या-

पार एवान्वेति । आख्यातजन्यवर्त्तमानत्वप्रकारकबोधे तज्जन्य-व्यापारोपस्थितेर्हेतुत्वकल्पनात् ।

नच व्यापारविगमे फलसत्त्वे पाको विद्यते इति स्यादिति वाच्यम् । भावार्थघञादेरनुकूलव्यापारार्थत्वात् । अत एव व्यापारसत्त्वे फलानुत्पत्तिदशायां पाको भविष्यतीति न प्रयोगः । नापि घटभूतलयोर्मिथः संयोग इतिवन्मिथो गमनमित्यादि । संयोग इत्यादौ तु घञादेः प्रयोगसाधुतामात्रम्, धात्वर्थमात्रप्रतीतेः । व्यापाररहितेऽपि वृक्षादौ संयुज्यते इत्यादिव्यवहारात्तत्र तिङोऽपि न व्यापारोऽर्थ इति न सकर्मकत्वम्, आश्रयत्वस्यैव तत्र तिङर्थत्वात् । नचैवं धात्वर्थतावच्छेदकफलशालित्वरूपं कर्मत्वं ग्रामादेरनुपपन्नम् । प्रत्ययोपनीतपरसमवेतव्यापारजन्यधात्वर्थफलशालित्वस्य कर्मत्वात् । प्रत्ययोपनीते परसमवेते च व्यापारस्य विशेषणम् । भूमिं प्रयाति विहग इत्यत्र विहगादेरपि स्वापेक्षया भिन्नो यः स्वावयवः तत्समवेतव्यापारजन्यधात्वर्थफलसंयोगवत्त्वात्स्वात्मानं प्रयातीत्यादिवारणाय प्रत्ययोपनीतेति । तादृशस्वार्थव्यापारस्तु न परसमवेतः । गमनात्मकव्यापारस्यैव प्रत्ययोपनीतत्वात्, तस्य च परसमवेतत्वाभावात् । गमनजन्यविभागशालिपूर्वदेशे ऽतिव्याप्तिवारणाय धात्वर्थेति । तण्डुलं पचतीत्यत्र आधेयत्वं द्वितीयार्थः, फले धात्वर्थे तदन्वयः । फलस्य जनकत्वसंबन्धेनाख्यातार्थव्यापारे तस्याश्रयत्वेन चैत्रेऽन्वयः । तण्डुलवृत्तिविक्लित्तिजनकव्यापारवांश्चैत्र इति धीः । चैत्रेण पच्यते तण्डुल इत्यत्र तृतीयार्थवृत्तित्वस्य तिङर्थे व्यापारे, तस्य जन्यत्वसम्बन्धेन धात्वर्थे फले, तस्याश्रयत्वेन तण्डुलादावन्वयः । चैत्रवृत्तिपरसमवेतव्यापारजन्यफलवांस्तण्डुल इति

धीः । फलव्यापारयोर्विशेषणविशेष्यभेदेन कर्तृकर्मव्यवहारः ।

अथ सुवर्थस्य धात्वर्थेऽन्वयः कल्प्य इति तस्याख्याता-न्वयकल्पनमयुक्तम्,एवम् आख्यातार्थव्यापारस्य धात्वर्थविशेष-णत्वमपि इति विभाव्यते, तर्हि तृतीयाया व्यापार एवार्थः, तत्र वृत्तित्वं प्रकृत्यर्थस्य संसर्गः, व्यापारस्य जन्यत्वेन धात्वर्थफले ऽन्वयः, तस्य निरूपितत्वसम्बन्धेन तिङर्थे ऽधिकरणत्वे तस्य तण्डुले ऽन्वयः ।

कर्मकृतः फलाश्रयः, कर्तृकृतश्च व्यापाराश्रयोऽर्थः, तण्डुलः पक्वः चैत्रो गन्ता इत्यादिसामानाधिकरण्यानुरोधात् । कर्मप्र-त्यये सुवर्थे एव व्यापारे वर्त्तमानत्वान्वयः । नच भिन्नपदोपा-त्तान्वये ऽतिप्रसङ्गः । फलबोधकधातुसमभिव्याहृतकर्माख्यात-जन्यवर्त्तमानत्वबोधे तृतीयाजन्यव्यापारोपस्थितेर्हेतुत्वात् । पक्वानित्यादौ कर्तृप्रत्यये तु एकदेशे व्यापार एव तदन्वयः ।

यद्वा व्यापारे आश्रये च खण्डशक्तिः विशिष्टमन्वयलभ्यम्। अत एव एवकारस्य अन्ययोगे व्यवच्छेदे च शक्तिः । अ-न्ययोगप्रतियोगिकव्यवच्छेदशक्तौ पार्थ एव मनुष्य इत्यादेः प्रसङ्गात् । पार्थान्ययोगो घटश्चेत्युभयाभावस्य मनुष्यत्वे सत्त्वा-त् । नचान्ययोगत्वावच्छिन्नप्रतियोगिताकव्यवच्छेदः शक्यः । वस्तुमात्रस्य यत्किञ्चिदपेक्षयाऽन्यत्वात् अप्रसिद्धेः । नचान्य-संयुक्तत्वावच्छिन्नप्रतियोगिताव्यवच्छेदो ऽन्यसमवेतत्वाव-च्छिन्नव्यवच्छेदश्च धवंसादौ प्रसिद्ध इति वाच्यम् । पार्थ एव धनुर्धर इत्यादौ बाधितत्वात्। पार्थस्यापि कुतश्चिदन्यत्वेन तत्स-मवेतत्वावच्छिन्नप्रतियोगिताकव्यवच्छेदस्य धनुर्धरत्वे विरहात् । पार्थान्ययोगत्वावच्छिन्नप्रतियोगिताकव्यवच्छेदस्य अन्ययोग-त्वावच्छिन्नप्रतियोगिताकव्यवच्छेदाद्भिन्नतया तदप्रत्ययप्रसङ्गाच्च।

एवं च नीलो घटो नास्तीत्यत्र नीलान्वितस्य घटस्याभावे ऽन्वयात् नीलघटत्वावच्छिन्नप्रतियोगित्वं संसर्गः तथा पार्थाद्यन्वितस्यान्ययोगस्य व्यवच्छेदे ऽन्वयात्पार्थान्ययोगत्वावच्छिन्नप्रतियोगिताकत्वं संसर्ग इति बोध्यम् । नच प्रतियोगितामात्रेणान्ययोगविशिष्टो व्यवच्छेद एवार्थो ऽस्तु व्युत्पत्तिबलादुक्तव्यवच्छेदलाभसम्भवादिति वाच्यम् । वाक्यार्थलाभ एव व्युत्पत्तेस्तन्त्रतया पदार्थस्य तदलभ्यत्वात् । नचैकपदार्थयोः कथं मिथो ऽन्वय इति वाच्यम् । आख्यातार्थकृतौ कालान्वयस्य परैरभ्युपगमादित्याहुः ।

केचित्तु व्यापारमात्रं धात्वर्थः । गतो गम्यते ग्राम इत्यादौ फलस्य कृदात्मनेपदाभ्यामेव लाभात्, ग्रामङ्गच्छति, ग्रामस्य गन्तेत्यादावपि द्वितीयादेः फलजनकत्वमर्थः । आदेशशक्त्यनङ्गीकारे तु तत्स्मारितद्वितीयाया एव सोऽर्थः ।

यद्वा षष्ठ्याः कर्मत्वे लक्षणा फलं चाधिकरणत्वसंसर्गेण नामार्थेऽन्वेति ।

यद्वा फलमात्रमर्थो जनकत्वं संसर्गः । नचैवं ग्रामं गच्छति त्यजतीत्यादौ फलसामान्यस्य द्वितीयादिना लाभेऽपि नियतसंयोगविभागादिलाभो न स्यात् । ततश्च गृहाद्ग्रामं गच्छति चैत्रे ग्रामस्येदं गमनं न तु गृहस्येति न स्यात् गृहवृत्तिफलजनकत्वसामान्याभावस्य तत्रासत्त्वादिति वाच्यम् । गम्यते ग्राम इत्यत्र फलमात्मनेपदार्थ इति वदतामपि फलविशेषप्रत्ययानुपपत्तिप्रसङ्गात् । नच तदवच्छिन्नव्यापारवाचिधातुसमभिव्याहारात्फलविशेषो लभ्यते यथेष्टसाधकत्ववाचकाद्धिरेव स्वर्गादिपदसमभिव्याहारात्स्वर्गजनकत्वम् । प्रतीतिस्त्विष्टत्वफलत्वाभ्यां स्वर्गत्वसंयोगत्वाभ्यां

वेत्यन्यदेतदिति वाच्यम् । गमिसमभिव्याहारे द्वितीयायाः संयोगः, त्यजिसमभिव्याहारे च विभाग एवार्थ इत्यत्र तयोस्तात्पर्यग्राहकत्वसम्भवादित्याहुः ।

नैयायिकास्तु फलावच्छिन्नव्यापारवाचित्वमेव धातोः सकर्मकत्वम् । त्यजेर्विभागावच्छिन्ने, गमेश्च संयोगावच्छिन्ने स्पन्दे शक्तत्वात् । धात्वर्थजन्यफलशालित्वमात्रस्य कर्मत्वे पूर्वदेशे गमेः कर्मत्वम्, उत्तरस्मिन् त्यजेः, स्पन्दश्च पूर्वापरदेशयोः स्यात् । उक्तरीत्या तु स्पन्देर्व्यापारमात्रे शक्तिर्नतु फलावच्छिन्ने इति न सकर्मकत्वम् । नचैवं जानात्यादेः सकर्मकत्वं न स्यादिति वाच्यम् । तत्र तज्ज्ञवहारस्य भाक्तत्वात् । नचैवं तत्र द्वितीयादिकं न स्यादिति वाच्यम् । "कर्मणि द्वितीया" इत्यनुशासनं हि तत्समभिव्याहारमपेक्ष्य प्रवर्त्तते "तेन रक्तं रागाद्" इतिवत्, तथा च पच्यादियोगे धात्वर्थतावच्छेदकफलशालिनि तण्डुलादौ द्वितीयादिकं विदधाति, जानात्यादियोगे धात्वर्थविषये घटादौ, स्पन्दादियोगे तूक्तान्यतरप्रकाराभावान्न कुत्रचिदिति व्यवस्थोपपत्तेः । "सकर्मकधातुयोगे द्वितीया' इत्येतादृशानुशाभावात् । तदेवं विवादे कथं विशिष्टा भावना धात्वर्थ इति प्राप्ते सिद्धान्तमाह भाष्यकारः—

'किं करोति' इति क्रियासामान्यविषयकप्रश्ने पचतीत्यादेरुत्तरस्य प्रयोगात् धात्वर्थ एव व्यापारः ।

ननु किं विषयकयत्नवानित्येव प्रश्नार्थः, कृञो यत्नार्थत्वात् ।

तदुक्तं कुसुमाञ्जलौ—

कृताकृतविभागेन कर्तृरूपव्यवस्थया ।
यत्न एव कृतिः पूर्वा परास्मिन्सैव भावना ।

---

१ गमित्यज्योरिति पाठः ।

क्रियाजन्यत्वाविशेषे ऽपि यत्रजन्याजन्यत्वप्रतिसन्धानात्पटाङ्कुरयोः कृताकृतव्यवहारात्, ज्ञात्रादिवदाश्रयपरतृजन्तकर्तृपदस्य यत्राश्रयबोधकत्वाच्च । क्रियायास्तदनुकूलव्यापारस्य वा कर्तृपदार्थत्वे तदाश्रयं करणमात्रं वा कर्तृपदार्थः स्यात् । अत एव पचतीत्यस्य पाकं करोतीति कृञा तिङर्थस्यैव विवरणम् ।

तदुक्तम्—

भावनैव हि यत्रात्मा सर्वाख्यातस्य गोचरः ।
तया विवरणध्रौव्यादाक्षेपानुपपत्तितः ॥ इति ।

इति चेत् ।

मैवम् । कृञो यत्रमात्रार्थकत्वे 'क्रियते घटः स्वयमेव'इति कर्मवद्भावानुपपत्तेः । कर्मस्थक्रियेष्वेव तद्विधानमिति वक्ष्यमाणत्वात् । अन्यथा 'ज्ञायते घटः स्वयमेव' इत्यस्यापि प्रसङ्गात् । तदुक्तम् —

निर्वर्त्ये च विकार्ये च कर्मवद्भाव इष्यते ।
नतु प्राप्ये कर्मणीति सिद्धान्तो हि व्यवस्थितः ॥

प्राप्यत्वं च क्रियाकृतविशेषवत्तया ऽनुपलभ्यमानत्वमिति वक्ष्यते । तस्मादुत्पादनैव कृञर्थः । उत्पत्तिमत्तयाच घट उपलभ्यते एव 'अयं घटः केनचित्कृतः' इति घटदर्शने ज्ञानोदयात् ।

नच घटोपादानविषयककृतौ साध्यतया घटस्यापि विषयत्वात् तद्व्यतिरेकेण च घटानुत्पत्तेर्यत्रवत्तयाऽपि घट उपलभ्यते एव, साक्षात्कारस्य त्वयाऽप्यभिधानादुत्पत्तेरतीन्द्रियत्वात् इति वाच्यम् ।

तदपेक्षया उत्पत्तेरेव तद्विषयत्वौचित्यात् । अन्यथा फलज्ञानस्यापि प्रवृत्तिप्रयोजकतया तद्विषयत्वस्याप्युत्पत्त्या आक्षेपात् 'ज्ञायते घटः स्वयमेव' इत्यादिकमपि स्यात् । नच तत्रो-

त्पत्तौ कृञो लक्षणा । उत्पादनाया उपाधिरूपतया शक्यतावच्छेदकत्वगौरवाद् । अत एवोत्पादना तिङर्थ इति रत्नकोषमतमपि मणिकृतैवमेव निरस्तम् । नच लक्ष्यतावच्छेदक इव शक्यतावच्छेदकेऽपि गौरवं न दोष इति शङ्क्यम् । लक्षणायाः शक्तिकल्पनोत्तरकल्प्यतया तत्र लाघवानादरणात् । अन्यथा निपादस्थपत्यधिकरणविरोध इति चेत् ।

न। उक्तप्रयोगरूपसाधकेन उत्पादनायामेव शक्तिपरिच्छेदात् ।

एवं किङ्करोतीत्यत्र कृञो यत्नार्थकत्वे प्रश्नवाक्ये तिङर्थयत्नानन्वयस्य वाच्यतया पचतीति उत्तरानुपपत्तिः । धातोः प्रश्नविषयार्थानवबोधात् ।

तथाहि—'किमेकं दैवतं लोके' इत्यादौ 'एकदैवतत्वव्याप्यधर्मप्रकारकज्ञानं ममेष्टसाधनम्' इति ज्ञानात् 'तादृशज्ञानं मम जायताम्' इतीच्छया उक्तवाक्यप्रयोगः । तस्य च 'एकदैवतत्वव्याप्यधर्मो मम जिज्ञासाविषयः' इति वाक्यार्थः । विष्णुदैवतमित्याद्युत्तरेण च जिज्ञासानिवृत्तिः, विष्णुत्वप्रकारकज्ञानोदयात् । तस्यैव विष्णुत्वांशे एकदैवतत्वव्याप्यधर्मप्रकारकज्ञानत्वरूपेणेच्छाविषयत्वात् । अन्यज्ञानादन्येच्छानुत्पत्तेः । सिद्धेऽपि तदनुत्पत्तेश्च । उत्पादनार्थत्वे तु व्यापारसामान्यविषयकप्रश्ने तद्विशेषविषयकोत्तरोपपत्तिरिति ।

नन्वेवं अस्ति भवतीत्यादिषु उभयांशविरह इति चेत् ।

मैवम् । तत्रापि क्रियासद्भावात् ।

तदुक्तम् ।

अस्त्यादावपि धर्म्यंशे भाव्ये ऽस्त्येव हि भावना ।
अन्यत्राशेषभावात्तु सा तथा न प्रतीयते ।

धर्म्यंशे धर्मिभागे,भाव्ये भाव्यतया विवक्षायाम्। भूधातोरु-

त्पत्तिस्थित्युभयार्थकत्वात्।"तत्र भवः""तत्र जातः"इति भेदनिर्देशात् अत एव तत्र लडादिप्रयोगः, कालस्य क्रियात्मकत्वात् ।

क्रियाभेदाय कालस्तु संख्या सर्वस्य भेदिका । इति,

कालानुपाति यद्रूपं तदस्तीति प्रतीयते । इति–

वाक्यपदीयोक्तेः ।

नचैवं 'घटं करोति' इत्यत्रेव 'घटो भवति' इत्यादावपि तत्प्रतीतिः स्यादिति वाच्यम् । अशेषभावाद्भावनाफलयोरेकनिष्ठत्वाद्भावना स्पष्टं न प्रतीयते इत्युत्तरार्द्धार्थात् ।

नचैवं 'किङ्करोति' इति प्रश्ने 'पचति'इत्यादिवद् 'अस्ति' इत्यादिकमपि उत्तरं स्यादिति वाच्यम् । सुस्थतया निश्चिते प्रश्नस्य विशेषविषयकत्वज्ञानात् तदभावे ऽपि आसन्नविनाशधर्मिकयथोक्तप्रश्ने अस्तीत्युत्तरस्य सर्वाभिमतत्वात् ।

ननु 'दिगस्ति''आत्मा भवति'इत्यादौ उत्पत्तेर्बाधिततया कथं भावना वाच्येति चेन्न । तत्तत्क्षणविशिष्टत्वेन तेषामप्युत्पत्तेः ।

यद्वा स्वरूपधारणमेव फलं तदाश्रयतैव साध्यत्वेनाभिधीयमाना व्यापारः । तथाचात्माऽऽदिः स्वरूपधारणं करोतीत्यर्थः । अस्तीत्युत्पन्नस्यात्मधारणमुच्यते इति निरुक्तकारोक्तेः ।

आत्मानमात्मना बिभ्रदस्तीति व्यपदिश्यते । इति–

वाक्यपदीयोक्तेश्च । नचैवं सकर्मकत्वापत्तिः । जीवत्यादिवदन्तर्भूतकर्मकत्वात् ।

यद्वा अस्तित्वमेव व्यापारः, अवच्छेदकतारूपा व्याप्तिः फलम् । अत एव 'मासमास्ते इत्यादौ धात्वर्थतावच्छेदकफलशालित्वरूपं मुख्यमेव कर्मत्वमिति भाष्ये द्वितीये वक्ष्यते ।

अथवा क्रियावाचित्वावश्यकत्वे ऽपि फलवाचित्वानावश्यकत्वात्सत्ताऽऽदिरेव क्रिया । अत एव 'पश्यति भवः स्वयमेव'

'दर्शयते भवः' इत्यादौ निवृत्तप्रेषणे विषयतारूपफलस्यैव धात्वर्थत्वं क्रियात्वं चेति स्वीकारः ।

एवं पच्यते ओदनः स्वयमेवेत्यादौ ।

एकदेशे समूहे वा व्यापाराणां पचादयः ।

स्वभावतः प्रवर्त्तन्ते तुल्यरूपं समाश्रिताः ॥ इति—

वाक्यपदीयानुसारेण विक्लित्तिमात्रं धात्वर्थः । तद्रूपक्रियाश्रयत्वात् ओदनादीनां कर्तृत्वमिति व्याचक्षते ।

भाष्येतु निरुक्तमप्युदाहृतम् —"षड् भावविकारा इति ह स्माह वार्ष्यायणिः" इति ।

अत्र कैयटः-भावस्य क्रियायाः षट् प्रकाराः तेषु चास्तिः पठित इति तस्यापि क्रियात्वम् ।

अथवा भावस्य सत्ताया एते प्रकाराः । सत्तैवानेकक्रियात्मिका साधनसम्बन्धाध्यवसीयमानसाध्यरूपा जन्मादिरूपतया भासते इति ।

तथाच जातिसमुद्देशे हरिणोक्तम्—

सम्बन्धिभेदात्सत्तैव भिद्यमाना गवादिषु ॥

इत्युपक्रम्य,

प्राक्क्रमविशेषेषु क्रिया सैवाभिधीयते ।

क्रमरूपस्य संहारे तत्सत्त्वमिति कथ्यते ॥ इति ।

व्यापारविशेषाणां साध्यत्वात्क्रमिकत्वाच्च तदुपहितसत्तायास्तद्योग इत्यर्थः ।

स्यादेतत् । जानाति,इच्छति,यतते,द्वेष्टि,इत्यादौ अवच्छेदकं फलं नास्त्येव, तथाच तत्र कथं सकर्मकत्वम्, वैयाकरणानां स्वार्थफलव्यधिकरणव्यापारवाचित्वस्यैव तत्त्वात् । नच ज्ञानजन्यं विषयतारूप्यमेव फलं घटनिष्ठमिति वाच्यम् । ज्ञानजन्यविषय-

तायां मानाभावात् । अतीतादौ तदुत्पत्तेरशक्यवचनत्वात् ।

तदुक्तं कुसुमाञ्जलौ–

स्वभावनियमाभावादुपकारोऽतिदुर्घटः ।

सुघटत्वे ऽपि सत्यर्थे ऽसति का गतिरन्यथा ॥

पूर्वार्द्धस्यायमर्थः–विषयस्य ज्ञानेन सह पूर्वमसम्बन्धे घट-ज्ञानं पटेऽपि ज्ञाततां जनयेत् असम्बद्धत्वाविशेषात् । स्वभावादेव तज्ज्ञानं पटीयमिति चेन्न । ज्ञाततास्वीकारवैयर्थ्यात् । नच क्रियात्वात्कर्मनिष्ठफलजनकत्वानुमानम् । इच्छति नश्यति इत्यादौ व्यभिचारात् । न च 'घटो ज्ञातः' इति प्रत्यक्षं मानम् । ज्ञानवैशिष्ट्यस्यैव तद्विषयत्वात् ।

तदुक्तम्–

अनेकान्तादसिद्धेर्वा नच लिङ्गमिह क्रिया ।

तद्वैशिष्ट्यप्रकाशत्वान्नाध्यक्षानुभवोऽधिके ॥ इति ।

इष्टतादीनामपि सिद्धिप्रसङ्गादित्यर्थः ।

अत्र वदन्ति–आवरणभङ्गजनकज्ञानं ज्ञानानुकूलव्यापारो वा जानातेः, इच्छाद्वेषानुकूलव्यापार इच्छतिद्विष्यादीनामर्थ इति सकर्मत्वमुपपन्नमिति ।

अद्वैतचन्द्रिकाकृतस्तु–नैतद्युक्तम् । आवरणभङ्गरूपफलस्य परोक्षज्ञानविषयनिष्ठत्वाभावात् । परोक्षवृत्त्या ऽसत्त्वापादकस्यैवावरणस्य निवृत्तेः। तत्र वृत्तेर्विषयसम्बन्धाभावेन विषयनिष्ठा-भानावरणभङ्गाभावात् । प्रमातृमात्रनिष्ठवृत्त्या प्रमातृनिष्ठावर-णभङ्गस्यैव सम्पादनात् । परंपरया फलसम्बन्धमादाय स-कर्मकत्वोक्तावकर्मकस्यापि तदापत्तेः । तस्यापि फलव्यापार-योर्धातुरित्यादिना त्वया स्ववाच्यव्यापारसमानाधिकरणफल-वाचकत्वोक्तेः । सुखादिस्थले आवरणस्यैवाप्रसिद्धत्वाच्च ।

अत एव ज्ञानमपि न फलम् । चैतन्यस्य नित्यतया फलत्वायोगात् । वृत्तिज्ञानस्य परोक्षस्य विषयनिष्ठत्वाभावात् । विषयतासम्बन्धस्य वृत्त्यनियामकत्वात् । सुखादिस्थले तदसम्भवाच्च ।

यदपि विषयताजनकज्ञानादिकं जानात्यादेरर्थ इति ।

तदपि न । विषयताया ज्ञानाद्यतिरिक्तत्वे ऽपि ज्ञानादिजन्यत्वे मानाभावात् । ज्ञानादिपूर्वं विषयतासत्त्वेऽपि ज्ञानाद्यभावादेवोपपत्तेः । ज्ञानादीनां च स्वोत्पत्तिद्वितीयक्षणे स्वकार्योपधानासम्भवात्स्वोत्पत्तिक्षणे सविषयकत्वाभावात् । तस्मादेवं वाच्यम्—असत्त्वापादकाज्ञाननिरूपकत्वाभावस्य यदधिकरणत्वं तत्प्रयोजकचिदेव जानात्यर्थः । उक्ताधिकरणत्वरूपफलवत्त्वेन घटादेर्ज्ञानादिकर्मता । सुखादिनिष्ठे तादृशाधिकरणत्वे ऽपि सुखाद्युपहितरूपेण चित् प्रयोजिका । सुखादेरसत्त्वदशायां तादृशचिदभावे उक्ताधिकरणत्वाभावात्तद्भावे तद्भावाच्च । न च यथोक्तनिरूपकत्वाभावप्रयोजकचिदेव ज्ञाधात्वर्थो ऽस्त्विति वाच्यम् । घटाकारवृत्तिदशायां प्रमातारं जानातीति प्रमङ्गात् । तादृशवृत्तिप्रयुक्तस्योक्तनिरूपकत्वाभावस्य प्रमातरि सत्त्वात् । उक्तनिरूपकत्वाभावाधिकरणत्वोक्तौ तु प्रमातृनिष्ठस्य तस्य स्वतः सिद्धतया न वृत्त्यवच्छिन्नचित्प्रयोज्यत्वम् इति न तदापत्तिः, घटादौ विघ्नाभावाधिकरणत्वस्य मङ्गलाप्रयुक्तत्ववत् । एवं च वृत्त्युपहितरूपेण सुखाद्युपहितरूपेण च तादृशप्रयोजकत्वाद् वृत्त्यवच्छिन्नचितो जानात्यर्थत्वम् इति ग्रन्थसङ्गतिः ।

यदितु तार्किकादिरीत्या साक्षात्करोतिजानात्योर्मुख्यसकर्मकत्वं नाभ्युपेयते तत्र ज्ञाधातोः शक्यता शुद्धचिद्व्यक्तावेव निरवच्छिन्ना, शक्यतानात्व एवानुगमार्थमवच्छेदकस्वीकारा-

त्व । घटं जानातीत्यादौ तदीयासत्त्वापादकाज्ञानविरोधित्वसम्बन्धेन घटादेर्ज्ञाधात्वर्थेऽन्वयः । तदीयत्वं च स्वावच्छिन्नचिद्विषयितात्वविषयितान्यतररूपस्तत्सम्बन्धः । स्वावच्छिन्नचिद्विषयित्वमात्रनिवेशे ब्रह्म जानातीत्यादावनुपपत्तिः । ब्रह्मणश्चित्स्वरूपत्वेन सावच्छिन्नत्वाभावात् । विषयित्वमात्रनिवेशे च घटं जानातीत्यादावनुपपत्तिः । घटादेर्जडत्वेनावरणकृत्याभावात् । घटादिविषयकत्वस्याज्ञाने ऽनङ्गीकारात् । अत उभयमुपात्तम् । अभानापादकाज्ञानसत्त्वे ऽपि परोक्षवृत्तिकाले घटं जानामीत्याद्यनुभवादसत्त्वापादकेतीत्याहुः ।

इदं च तर्ककौतूहले विचारितमस्माभिरिति तिष्ठत्वतिविस्तरः ॥

उपदेशे ऽजनुनासिक इत् २।

उपदिश्यतेऽनेनेत्युपदेशः । "कृत्यल्युटो बहुलम्" इति वा-बाहुलकात्करणे घञ् । नच तदाश्रयणे मानाभावः । भाष्योक्तेरेव तथात्वात् । सच धातुपातिपदिकपाठे, सूत्रवार्त्तिके च । एतर्हि शब्दा उपदिश्यन्ते । तत्रानुनासिकोऽच् इत् संज्ञा स्यात् । नच "पुंसि संज्ञायां घः प्रायेण" इति घप्रत्यय एवास्त्विति वाच्यम् । संज्ञात्वाभावात् । शास्त्रकारसङ्केतविरहात् । नच प्रायेण संज्ञायामिति व्याख्यानाद् असञ्ज्ञायामपि तदुपपत्तिः । प्रायसंज्ञाग्रहणयोर्विधेयविशेषणत्वमपहाय परस्परं विशेषणविशेष्यभावानौचित्यात् । तदुक्तं भाष्ये "नह्युपाधेरुपाधिर्भवति विशेषणस्य वा विशेषणम्" इति । उपाधिविशेषणयोश्च वाच्यत्वावाच्यत्वाभ्यां विशेषः । यथा दृतिहरिशब्देन पशुरभिधीयते इति पशुरुपाधिः । गार्गिकया श्लाघते

इत्यत्र श्लाघाया वुञाऽनभिधानात्सा विशेषणम् ।
तदुक्तम्—

अर्थविशेष उपाधिस्तदन्तवाच्यः समानशब्दो यः ।
अनुपाधिरतोऽन्यः स्यात् श्लाघादिविशेषणं यद्वत् ॥

अनयोश्च क्रियाभावशब्दयोरिव क्वचित्पर्यायत्वं क्वचिद्भेदेन व्यवहार इति द्रष्टव्यम् । तस्माद्बाहुलकमेव स्थितमिति मूलानुयायिनः ।

एतेनोपदेशपदार्थविचारभाष्यस्योपक्रमस्थस्य न्यायप्राप्तानुवादकस्य प्राबल्यानुमानेनोक्तार्थे भाष्यकृतस्तात्पर्यं नास्तीति परास्तम् । उत्तरपक्षत्वेन साक्षादुपन्यस्ते तात्पर्याभावानुमानस्य बाधितत्वात् ।

यदप्युक्तम्—भाष्यकारस्य करणे घञुक्तिः किं पाणिनीयव्याकरणसापेक्षा उत तन्निरपेक्षा ।

नाद्यः । उक्तन्यायेन घञसिद्धेः । नान्त्यः । पाणिनीयसूत्रोपन्यासस्यासङ्गततापत्तेः । तस्मान्न्यायविरुद्धे भाष्यस्य न तात्पर्यमिति ।

तदप्यसत् । बहुलग्रहणानुसारेण सूत्रतात्पर्यस्यैव भाष्यकृता स्फुटीकृतत्वात् । अन्यथा बहुलग्रहणवैयर्थ्यापत्तेः । प्रत्याहारशब्देऽधिकरणे घञिति स्वयमेवोक्तत्वाच्च । अत एवासन्न्यायोपन्यासपूर्वकस्मृतिसाम्यमप्यपास्तम् । भावघञन्तत्वपक्षे उच्चारणक्रियायामन्त्यत्वासम्भवेन शब्दद्वारकस्यान्त्यत्वस्य ग्रहणे गौरवाच्च । अन्यथा प्रतिज्ञासमधिगम्ये प्रतिज्ञाशब्दस्य लक्षणेति वदतां कर्मण्यङा दूषणानुपपत्तेश्च ।

अन्ये त्वाहुः—वासरूपन्यायेन करणेऽपि घञ् सुवचः । नच क्त्यल्युट्तुमुन्खलर्थेषु वासरूपविधिर्नास्तीति वाच्यम् । भावानवबोधात् । तत्र हि क्त्यल्युटौ नपुंसके भावे विहितावेव गृह्येते,

परस्परसाहचर्यात् । नतु भूतवर्त्तमानक्तौ करणाधिकरणल्युटौ च । तेन "निष्ठा" इतिभूतक्तविषये अशयिष्ट अभविष्ट इत्यादौ लुङ् सिद्धः । विधिसामर्थ्यात्समाधाने गौरवात् । तथा "क्षीतः क्तः", "मतिबुद्धिपूजार्थेभ्यश्च"इति वर्त्तमानक्तविषये क्ष्वेदते, क्ष्विद्यति, मेदते, मेद्यति, स्वेदते, स्विद्यति, इच्छति, जानाति पूजयतीत्यादौ लट्, तद्भिन्नधातुषु लङ्विधेश्चरितार्थत्वात् । एवं करणल्युटो विषये उपदेशेत्यादौ, अधिकरणल्युटो विषये प्रासाद इत्यादौ घञ् । नचैवं धातुमात्रात्करणाधिकरणयोर्घञापत्तिः । "अभिधानलक्षणाः कृत्तद्धितसमासाः" इति न्यायात् ।

अयमेव वाहुलकात्करणे घञं वदतो भगवतोऽप्यभिप्रायः । "कृत्यल्युटो वहुलम्" इत्यत्र ल्युट्पदं करणाधिकरणल्युट्परम्, क्वचित्कारकान्तरेऽपि भवति क्वचित्करणाधिकरणयोरपीत्यर्थकवहुलशब्दस्य तेनैव सम्बन्धसम्भवात् । भावातिरिक्ते साधने करणाधिकरणयोरित्यनेनैव ल्युटो विधानेन तत्र भावल्युटो ग्रहणासम्भवात् । अत एव तत्र कृत्यग्रहणमपि कर्मार्थकतत्परम् । कारकान्तरे ऽपि भवतीत्यर्थेन वहुलग्रहणेन वहुभ्यो धातुभ्यः सदा भवति कस्माच्चिद्धातोः कदाचिद्भवतीत्यर्थः । तथाच प्रकृतपरिभाषायां करणाधिकरणल्युटो ग्रहणं न भवति वैयर्थ्यादिति पर्यवसन्नम् ।

अत एव प्रत्ययसूत्रे प्रतियन्त्यर्थमनेनेति प्रत्ययः । यद्वा "पुंसि संज्ञायाम्" इति घइति अनुन्यासग्रन्थः सङ्गच्छते। वाहुलकात्परस्यापि करणल्युटोऽप्रवृत्तिपक्षे अचः सम्भवात् ।

एतेन करणल्युटा वाधितत्वादेरच् तत्र न भवत्येव उक्तपरिभाषानुरोधादिति मैत्रेयग्रन्थो निरस्तः ।

यत्तु सीरदेवेनोक्तम् तत्परिभाषायां क्तस्तावन्नपुंसके

भावे विहित एव गृह्यते ल्युटा साहचर्यात् । ल्युडपि यदि भावे विहित एव गृह्येत तर्हि तेनैव हासमित्यादेर्वारणसम्भवात् क्त-ग्रहणं व्यर्थमेव स्यात् । क्तग्रहणाश्रये तु ल्युट् त्यक्तुं न शक्यते सकर्मकेभ्यो भावे क्तस्याभावात् । तथाच क्तग्रहणसामर्थ्यात्सामान्यविहितो ल्युट् गृह्यते इति मैत्रेयोक्तं युक्तमिति ।

तन्न । ल्युट्सामान्यग्रहणे तत्साहचर्याद्भावे क्त एव गृह्यते इत्यस्य व्याहतत्वात् । नापि ल्युट्ग्रहणेन हासमित्यादिवारणसम्भवः, परस्पराप्रवृत्तिपक्षे एव परस्परेण प्रवर्त्तितव्यमित्यस्य सर्वसंमततया ल्युटोऽप्रवृत्तिपक्षे तस्य नित्यं बाधकत्वाभावेन घञो दुर्वारत्वात् ।

यदपि तेनोक्तं वुञ्छणादिसूत्रे सप्तदशप्रश्नया इति वृत्तिग्रन्थोऽनुन्यासमते ऽनुपपन्नः स्यात् । "परिमाणाख्यायां सर्वेभ्यः" इति घञोऽजपवादत्वात् ।

तदप्ययुक्तम् । प्रत्ययशब्दस्य परिमाणाख्यत्वाभावात् । नच संख्यावाचिन्युपपदे घञिति तदर्थः । एकस्तण्डुलनिचायः । द्वौ शूर्पनिष्पावौ इत्यादिभाष्योदाहरणविरोधात् । "उपपदमतिङ्" इति नित्यसमासप्रसङ्गादित्याहुरित्यास्तां तावत् ।

उदाहरणम् एधेत्यत्र अनुदात्ताकारस्य इत्सञ्ज्ञत्वाद् "अनुदात्तङितः" इत्यात्मनेपदम् । नच तस्यानुभवसिद्धत्वाभावः । सूत्रकृता तादृशस्यैव पाठे ऽपीदानीमनुनासिकपाठस्यापभ्रष्टत्वात् । तदुक्तं प्रतिज्ञानुनासिक्याः पाणिनीया इति । एवं तत्र तत्राभियुक्तव्यवहारवशादुन्नेयम् ।

उपदेशे किम् । अभ्र आँ अपः । "आङो ऽनुनासिकश्छन्दसि" इत्यनुनासिकः । अस्य शास्त्रे पाठाभावान्न संज्ञा ।

ननु "उञ ऊँ" इत्यत्रातिप्रसङ्गः, स्वरूपेणैव पठितत्वात्,

विधानसामर्थ्यस्य चोभयत्रापि अविशेषात् । नच 'अनेकान्ता अनुबन्धाः' इति पक्षे अभ्र आं अटित इत्यादावादित्त्वादिडभावार्थम् इत्सञ्ज्ञापत्तिः । आङिदित्येतावताऽपि तत्सिद्धेः । अत एव दधीच्छति दधि ब्राह्मणकुलम् । दधीयतेः क्विप्यल्लोपयलोपह्रस्वेषु "अणोऽप्रगृह्यस्य" इत्यनुनासिकस्य "अनुनासिक" इति इत्संज्ञायां नुमापत्तिः । दधिमथ्वादिषु पचतिभवतीत्यादिषु इत्कार्यं लोप एव स्यादत उपदेशग्रहणमित्यपास्तम् । "अणप्रगृह्य इद्" इत्येतावतैव तदुपपत्तेरनुनासिकविधानवैयर्थ्यात् । "इतश्च" इति लोपविधानवैफल्याच्च । तस्मादुपदेशपदं व्यर्थमिति चेत् ।

अत्राहुः—उत्तरार्थं तदिति । अजिति किम् । मनिनो मकारस्य मा भूत् । तथा च "अन्येभ्यो ऽपि दृश्यते" इति हलन्तेषु मित्त्वादन्त्यादचः परः स्यात् । अनुनासिकः किम् । चिरिणोति जिरिणोति । अत्र मा भूत् ।

हलन्त्यम् ३।

उपदेशेऽन्त्यं हलित्स्यात् । नचापेक्षिकमन्त्यत्वमतिप्रसङ्गि । अन्त्यपदस्वारस्येन तत्तद्धातुत्वाद्युपाधिपरिच्छिन्ने समुदाये यदन्त्यं तस्योपादानात् । शीङ् स्वप्ने । ङित्त्वात्तङ् । शेते । उपदेशे किम् । अग्निचित् । सोमसुत् । नच तुग्विधानसामर्थ्यम् । आगत्येत्यादौ चरितार्थत्वात् । नच क्विपः पित्त्वविधानवैयर्थ्यम् । अग्निचितावित्यादौ सार्थक्यात् । इति हरदत्तः । अन्त्यं किम् । मनिनो मकारस्य मा भूत् । वेश्म सद्म । "सर्वधातुभ्यो मनिन्" । सत्यामित्सञ्ज्ञायां "मिदचोऽन्त्यात्परः" इत्यस्य प्रसङ्गात् ।

वस्तुतः पूर्वसूत्रे ऽञ्ग्रहणसामर्थ्यादेवात्र न दोषः । अनेन तेन वा मकारस्येत्संज्ञायां विशेषाभावात् ।

एवं "पः प्रत्ययस्य" इत्यादिकमप्यत्र साधकं ज्ञेयम् । "श्रोत्रियंश्छन्दोऽधीते" "क्षेत्रियच् परक्षेत्रे चिकित्सः" इत्यादौ वाक्यार्थे पदवचनमिति पक्षे प्रकृतिप्रत्ययविभागाभावेऽपि उपदेशेऽन्त्यत्वादित्संज्ञा । सनुतर् इत्यादेः स्वरादिपाठेऽपि रेफो नेत्सञ्ज्ञः, उच्चारणसामर्थ्यात् । अन्तोदात्तनिपातनानुरोधेन रित्स्वरस्य दुर्वचत्वात् ।

स्यादेतत् । "आदिरन्त्येन" इत्यस्य इत्सञ्ज्ञाधीनप्रवृत्तिकतया "हलन्त्यम्" इति सूत्रस्य च तदधीनप्रवृत्तिकतया अन्योन्याश्रयः पदार्थबोधं विना वाक्यार्थबोधस्यासंभवात् ।

अत्राहुः—हलिति योगो विभज्यते हस्य ल् हल् । सामीप्यं षष्ठ्यर्थः । नच तत्र विप्रतिपत्तव्यम् । "अस्तेर्भूः" इत्यत्र "अस्तेः समीपे ऽनन्तरे वा" इति भाष्यदर्शनात् "ग्रो यङि" इत्यत्रानन्तर्यं षष्ठ्यर्थ इति शङ्कायास्तदारूढत्वाच्च । ब्राह्मणकम्बल इत्यादौ तु स्वस्वामिभावसंबन्धस्योत्थिताकाङ्क्षत्वात्प्रतीतिरित्युत्सर्गः । अन्यथा त्विष्टापत्तिः । अनन्तरादिषु बहुव्रीहेरेवानभिधानस्य भाष्यकारैरुक्तत्वात् । अत एव न समीपार्थे बहुव्रीहिरस्त्यनभिधानादिति सीरदेवेनाप्युक्तम् ।

यत्तु "ङेप्रथमयोरम्" "लसार्वधातुकमनुदात्तम्" "उदात्तस्वरितयोर्यणः" इत्यादौ क्लृप्तस्य स्थान्यादेशसम्बन्धस्य बाधः । नच हकारस्थानिकलकारासिद्धिः । "नहो धः" इति हस्य धत्वे "तोर्लि" इति लत्वे च उपानल्लुनातीत्यत्र तत्सत्त्वात् । नचासिद्धत्वम् । धुडादिष्वित्सञ्ज्ञानापत्तेः । इत्संज्ञायां "पूर्वत्रासिद्धम्" इत्यस्याप्रवृत्तेः । नापि साक्षाद्धकारस्थानिकलकाराभावेन परिभाषाबाधः । भविता भवितारावित्यादौ स्वरानापत्तेः । प्रथमोपस्थितपरिभाषाऽनुरोधेन परं-

परादेशग्रहणस्योचितत्वाच्चेति ।

तदसत् । हल्शब्दार्थप्रसिद्ध्युपपादकत्वेनोक्तकल्पनायां तदनुपपादकहकारस्थानिकलकारेत्सञ्ज्ञापादकशंकाया अभुक्तवान्तत्वात् । अनुवादे च परिभाषाऽनुपस्थानात् । अन्यथा "उदीचामातः स्थाने"इत्यत्र स्थानेग्रहणवैयर्थ्यात् । तेन स्थानेयोगपरिभाषाया अनित्यत्वज्ञापने ऽपि फलतो विशेषाभावात् । अत एव स्थानिवत्सूत्रे "अनल"इत्येवास्तु अनुवादतया स्थानेयोगाभावात् । सम्बन्धसामान्ये षष्ठीमाश्रित्य अलोऽलेत्याद्यर्थलाभसंभवादिति शङ्कितं ग्रन्थकारैः । अत एव"सिद्धन्तु प्रसङ्गे रपरत्वाद्" इति पक्षे ऋकारस्य योऽण् स प्रसङ्गावस्थायामेव रपरः स्यादित्यर्थे ऋकारसमीपस्थस्याप्यणो रपरत्वं स्यादित्याशङ्क्य द्वितीयस्थानशब्दमनुवर्त्य ऋकारस्थानिकस्याणो लाभ इत्युक्तमाकरे । धुडादौ तु कार्यकालपक्षमालम्ब्य इत्सञ्ज्ञाया उपपादितत्वात् । अत्र च तत्कल्पने प्रमाणाभावात् । लत्वस्यासिद्धत्वाभावे बीजस्य दुर्बचत्वात् । उपदेशे इत्यस्य प्रकृतत्वात् । नच श्रुत्या प्रकरणबाधः । उपदेशग्रहणमुत्तरार्थमिति सिद्धान्तात् । तस्यापि श्रुतित्वाविशेषात् ।

एतेन व्यस्तप्रयोगो ऽपि दुर्लभ इत्यपास्तम् ।

भवितेत्यादौ तु स्थानिवद्भावेन डादीनां सार्वधातुकत्वमस्त्येवेति न दोषः । परम्परया लादेशत्वस्यापि तत्र सत्त्वात् । नच तासेः परस्य लादेशसार्वधातुकस्यानुदात्तत्वविधानं भवितासीत्यादौ साक्षाल्लकारादेशे सिबादौ चरितार्थमिति कथमादेशादेशे डादौ तत्प्रवृत्तिरिति वाच्यम् । उभयपक्षसाधारण्यात् । अकारसन्निहितसार्वधातुकस्याप्रसिद्ध्या तत्र सामर्थ्याल्लकारादेशग्रहणमित्येवाधिकस्य वाच्यत्वात् । नच चलतीत्यादौ श-

बादिरेव तथा प्रसिद्धइति वाच्यम् । तास्यादेः परस्येत्यपि सार्वधातुकविशेषणस्य श्रूयमाणत्वात् । विशिष्टस्य तथाऽप्यप्रसिद्धेः । "लस्य" इति सूत्रे लकारो ऽनुनासिको निर्दिश्यते इति भाष्योक्तपक्षे "लसार्वधातुकम्" इत्यत्रापि तादृशस्यैव लकारस्योपादानाच्च । एतेन "उदात्तयणो हल्पूर्वात्", "उदात्तस्वरितयोर्यणः" इत्यादिकमपि व्याख्यातम् । यणो हल्पूर्वत्वनियमात् तत्परस्य चानुदात्तस्यैव तत्सूत्रप्रवृत्तिस्थले ऽपेक्षितत्वात् । तत्र बाधसद्भावात् षष्ठ्या सामीप्यस्य वक्तुमशक्यत्वात् । ननु "उदात्तयणः" इति सूत्रे हल्पूर्वग्रहणस्य बहुतिथवा ब्राह्मण्येति व्यावर्त्यं भाष्ये वक्ष्यते इति चेत् । सत्यम् । तत्र "बहोर्नञ्वदुत्तरपदभूम्नि" इति अतिदेशोदात्ततया उकारपूर्ववर्त्तिनां शेषनिघातेन टाविभक्तेश्च सुप्स्वरेणानुदात्ततया बाधतादवस्थ्यात् । तथा चोभयोरपि नियमाभावात् प्रयोजनवशेन प्रकृते सामीप्यस्य षष्ठ्यर्थत्वे बाधकाभाव इति सिद्धम् ।

नन्वेवमपि लसूत्रस्थलकारस्य हकारसंनिधानेनैव हल्प्रत्याहारापत्तिः । अव्यवहितसामीप्यानुपपत्तावेव व्यवहिततदुपादानात् । यद्वा हल् च ल्चेति द्वन्द्वः । नच हल्शब्दार्थानवबोधात्सहविवक्षाऽनुपपत्तौ कथं द्वन्द्व इति वाच्यम् । "आदेशप्रत्यययोः" इति सूत्रे आदेशाभिन्नः प्रत्ययावयवश्च यः सकार इति व्याख्याय सहविवक्षां विनाऽपि सौत्रो द्वन्द्व इति स्वयमेवोक्तत्वात् । नच तत्रोभयनिर्देशस्य प्रत्यक्षत्वात् तथा, अत्र तु नेति वाच्यम् । अन्योऽन्याश्रयपरिहारस्यावश्यकतयाऽत्रापि साम्यात् ।

वस्तुतो ऽत्र न तदनुपपत्तिः । हल्पदं सार्थकमाप्तप्रयुक्तत्वादिति सामान्यतोऽर्थवत्ताज्ञाने सति तस्याः सुस्थत्वात् ।

लकारस्येत्सञ्ज्ञायाम् "आदिरन्त्येन" इति प्रत्याहारसिद्धौ पश्चादेव हल्पदार्थविशेषज्ञानसम्भवात् । पाणिनेस्तादृशविवक्षायाः सम्भवाच्च । प्रयोगे वक्तृविवक्षाया एवापेक्षितत्वात् । वाक्यप्रयोगहेतुज्ञानस्य तच्छब्दातिरिक्तप्रमाणजन्यत्वनियमात् । अनेकशक्तेः शब्दस्य शक्त्यवच्छेदेन संज्ञिनि विनियोगाद् इत्यादिकमप्यत्र योज्यम् ।

यत्तु "तुल्यास्यप्रयत्नं सवर्णम्" "अणुदित्सवर्णस्य" इतिप्रणयनेन अकारहकारादयो ग्राहका इत्यर्थस्य ज्ञातत्वेन "अइउण्" "हयवरट्" इत्यादीनां तदर्थाभिप्रायेण प्रणयनापत्तिरिति ।

तदसत् । अकारादिभिरकारादिग्रहणमापाद्यम्, उताकारादिहकारादीनां परस्परं ग्राह्यग्राहकभावः । नाद्यः । इष्टत्वात् । नान्त्यः । "नाज्झलौ" इति बाधकसत्त्वात् । एतेनाकारादीनां तुल्यस्थानानां च परस्परं सावर्ण्यं नेति सूत्रकारज्ञानं कल्प्यम्, तत्र चाकारहकारयोरिवाकारयोरपि सावर्ण्याभावो विषय इति निरस्तम् ।

आचार्यस्य विशेषदर्शित्वेन तद्विषयकज्ञानस्य बाधितत्वात् । अत एव ज्ञानज्ञानस्य तद्विषयविषयकत्वनियमे ऽपि भ्रमविषयकेऽपीश्वरज्ञाने ग्राह्यभ्रमविशेषे शुक्त्यादौ प्रकारीभूतरजतत्वादिवैशिष्ट्यविषयकत्वं नास्तीति तार्किकसिद्धान्तः । तुल्यस्थानप्रयत्नानामप्यज्झलां परस्परं सावर्ण्यं नास्तीत्यस्मिन्नाचार्यज्ञाने अच्त्वावच्छिन्नस्य हल्त्वावच्छिन्नेन सावर्ण्याभाव एव विषयो न त्वच्त्वावच्छिन्नस्य तेन, हलत्वावच्छिन्नस्य वा तेनेति स्पष्टत्वात् ।

यत्तु मुखनयनं पश्येत्यादावन्यतरपदार्थज्ञानशून्यस्यैकतरपदार्थविषयकदर्शनान्वयबोधे ऽपि उभयपदार्थज्ञानवतः सहबोधस्यैव सत्त्वेन वक्तृतात्पर्यनिर्वाहः । प्रकृते तु बोद्धॄणां

सहबोधस्य वक्तुमशक्यत्वादाचार्याणामपि तदभिप्रायेण शब्द-प्रयोगाभावात्सहविवक्षाऽनुपपत्तिरेवेति ।

तदप्यसत् । 'द्वयोः सहबोधो जायताम्' इत्येव तात्पर्यम् । सचोभयशक्तिज्ञानवतः सहैव इतरस्य त्वन्यथेति हि वस्तुस्थितिः। प्रकृते तु सूत्रकारस्यैव युगपद् बोधः, अस्मदादीनान्तु पूर्व लकारेत्सञ्ज्ञाबोधः ततो हल्पदार्थज्ञाने द्वयोः सहबोधः । 'सहैव बोधो जायताम्'इति तात्पर्ये मानाभावात् । सामान्यबोधस्तु अस्म-दादीनामपि सहैव भवतीति स्पष्टम् । पदद्वयशक्तिज्ञानविरहिणो ऽपि सह बोधो जायतामिति तात्पर्यस्य च बाधितत्वात् ।

ननु स्ववाक्यात्स्वान्वयबोधो न भवत्येव प्रकृतान्वयबोध-समानाकारकज्ञानाभावरूपस्वरूपसदाकाङ्क्षाविरहात् ।

मैवम् । इच्छाविरहविशिष्टस्यैव ज्ञानस्य तत्र निवेशात् ।

तथा चोक्तं शब्दालोके—प्रत्यक्षावगते ऽप्यनुमित्सावत् 'शब्देन जानीयाम्' इतीच्छायाः सौलभ्येनाकाङ्क्षासत्त्वे हेत्वन्त-राभावस्य दुर्वचत्वात् । अत एव द्वितीयटीकायां स्वोक्तशब्दस्य स्वं प्रति अर्थप्रत्यायकत्वं सिद्धान्तितमिति ।

यत्त्वेकं विना ऽपरस्यान्वय इति स्वीकारे 'देवदत्तो यज्ञ-दत्तश्च गच्छतः' इतिवद् 'देवदत्तयज्ञदत्तौ गच्छति' इति प्रयो-गापत्तिः । तथाचैतादृशविषये द्वन्द्वासाधुताया आवश्यकत्वात्स-हितबोधस्यैव वक्तृतात्पर्यविषयत्वं वाच्यमिति ।

तदप्यसत् । सहबोधस्योपपादितत्वात् । धातुनाम्नोश्च स-मानवचनान्तत्वनियमादुक्तापत्तेरनवतारात् । साधुतार्थं द्विव-चनापेक्षायामपि बोधार्थं तदभावात् । इयान् विशेषः-कर्त्राख्याते कर्तृपदेन समानवचनत्वं कर्माख्याते तु कर्मवाचकपदेनेति । तस्मादुक्तद्वन्द्वो निरवद्यः ।

अभ्युपेत्य तु ब्रूमः—हल् ल् इति पृथगेवास्तु। न चात्र संयोगान्तलोपानुपपत्तिः। एकस्यापि पदस्य संयोगान्तत्वाभावात्, पदसमुदायस्य पदग्रहणेनानुपादानात् इति वाच्यम्। संयोगान्तत्वपदान्तत्वयोः लकारविशेषणत्वपक्षे तदुपपत्तेः। संयोगस्य पदविशेषणत्वात्तदन्तविधिनैव सिद्धावन्तग्रहणं विशेष्येण पदेनापि सह संबन्धार्थम्। संयोगेति लुप्तषष्ठीकम् इति व्याख्यानात्। पृथक्सर्वेभ्यो विभक्तावेकशेष इति पक्षे वृक्षस् स् इत्यत्र संयोगान्तलोपस्य भाष्य एवोपन्यासात्। नच हल्ङ्यादिलोपाभिप्रायं तदिति कैयटव्याख्यानविरोधः। अत्र व्याचक्षते इत्युपक्रम्यान्यमतेनैव तत्प्रवृत्तेः। अन्यथा सुतिसीतिप्रत्ययैः प्रकृतिराक्षिप्यते इति कैयटोक्तसिद्धान्तविरोधात्। "अस्तिसिचोऽपृक्ते" इति सूत्रे द्विसकारको निर्देश इति भाष्यस्य सिचम्स् इति च्छेदे संयोगान्तलोपेन कौस्तुभ एव व्याख्यानात्।

यत्तु लोपद्वारेण लक्षणाया एवान्वाख्यानं तस्याः शक्यज्ञानं विनाऽनुपपत्तेः परस्पराश्रय इति।

तदप्यसत्। हल्पदार्थसम्बन्धिनिलक्षणाया इहानाश्रयणात्। किन्तु हल् इति समुदायस्य हल्ल् इति समुदायपरत्वं कल्प्यते, तच्च न लक्षणया किन्तु लकारस्मरणेन तल्लोपज्ञानशून्यानां उक्तसमुदायज्ञानाभावात्। यत्र लोपज्ञानशून्यानामपि तादृशार्थबोधो यथा—नीलः पट इत्यादौ तत्रैव लक्षणायाः स्वीकारात्। व्यतिसे इत्यादौ लुप्तस्य धातोरेव तदर्थप्रत्ययकत्वमिति मणिकारादिभिरुक्तत्वात्।

यत्तु लकारे इत्संज्ञाप्रवृत्तिसमये हल्शब्दवाच्यं किञ्चिदित्संज्ञं भवतीति वाक्येन अक्षु इत्संज्ञापत्तिः। किञ्च उक्तरीतेर्यथाश्रुतग्राहिणं प्रति प्रवृत्तावपि 'नहि निर्विशेषं सामान्य-

म्' इति न्यायेन नियतशास्त्रार्थस्य युक्तत्वं, प्रकारान्तरेण तन्निर्णये लकारप्रश्लेषो व्यर्थ इति ।

तदप्यसत् । हल्शब्दवाच्यं किञ्चिदस्तीति ज्ञानस्यापि हल्मात्रविषयकत्वात् । एतावाँस्तुभेदः वाच्यत्वेन ज्ञानं हकारादिवृत्त्यसाधारणधर्मांशे सप्रकारकं हल्त्वेन ज्ञानं निष्प्रकारकमिति । निर्विशेषं न सामान्यमिति न्यायस्य तु सामान्यप्रकारकज्ञानस्यापि विशेषविशेष्यकत्वमित्यर्थो नतु तद्धर्मावच्छिन्नविशेष्यकत्वमपीति । पूर्वं हल्शब्दवाच्यविशेषानवधारणेऽपि पश्चात्तदवधारणात् । तावता तद्धर्मस्याज्ञात्तितायामुक्तिसम्भवाभावात् । नच हल्शब्दवाच्यं किञ्चिदस्तीति ज्ञानं न सूत्रप्रवृत्तावुपयोगि तस्य लक्ष्यसंस्कारकत्वाभावादिति वाच्यम् । परम्परया तत्सत्त्वात् । तादृशज्ञानाऽनङ्गीकारे तवापि सम्पूर्णसूत्रावृत्तिर्न स्यात् । तात्पर्यग्रहस्य तत्रापेक्षितत्वात् । तात्पर्यसत्त्वे त्वावृत्तिरित्युक्तेः ।

यदप्युक्तम्—असतः संज्ञिनः संज्ञाविरहप्रतिपादकभाष्येणानिर्धारिते संज्ञिन्यपि न्यायसाम्यात्तदभावोपपादनेन भाष्यविरोध इति ।

तदप्यसत् । कल्पनानुरोधेन तन्निर्णयसंभवात् । तथा च तत्र कैयटः—सत्यसति वा संज्ञिनि बुद्ध्या विपर्यीकृते शब्देन पूर्वनिर्दिष्टे संज्ञा प्रवर्तते इति तिष्ठतु विस्तरः ।

स्यादेतत् । तथाऽप्युभयत्र संयोगान्तलोपानुपपत्तिः । तत्र यणः प्रतिषेधारम्भात् । झल् इत्यपकृष्य संयोगान्तस्य झलो लोपविधानाच्चेति ।

मैवम् । बहिरङ्गलक्षणत्वाद्वेति तृतीयपक्षे तदुपपत्तेः ।

यदप्युक्तम्—अन्तरङ्गे संयोगान्तलोपे कर्तव्ये बहिरङ्गस्य सुलोपस्यासिद्धत्वमिति ।

तदप्यसत्। पचन्नित्यादौ झलपकर्षपक्षसाधारण्यात्। नच वचनसामर्थ्यम्। प्राङ्भ्यामित्यादौ चरितार्थत्वात्। यथोद्देशपक्षस्य त्वत्रापि सुवचत्वात्। नचैवं बहिरङ्गलक्षणत्वाद्वेत्यस्यानुपपत्तिरिति वाच्यम्। यत्र यणो लोपप्रसक्तिस्तत्र कार्यकालपक्षमाश्रित्य प्रवृत्तेर्वाच्यत्वात्। नचैकस्मिन्नेव लक्षणे एकस्याः परिभाषायाः प्रवृत्त्यप्रवृत्तिविरोधः। लक्ष्यभेदेन लक्षणभेदमाश्रित्य तदुपपत्तेः।

वस्तुतस्तु हल्ङ्यादिलोपापेक्षया संयोगान्तलोपस्यैव बहिरङ्गत्वं विजातीयसंज्ञाघटितत्वात्। नच तस्याप्यपृक्तसंज्ञाघटितत्वात्साम्यम्, तस्याश्च प्रत्ययघटितत्वमपीति वाच्यम्। संयोगसंज्ञाया अपि संज्ञाद्वयघटितत्वात्। हलांच विशेष्यतया अचामभावप्रतियोगितया तत्र निवेशात्। सुप्तिङन्तं पदं "स्वादिष्वसर्वनामस्थाने" इति द्विविधायाः पदसंज्ञायास्तत्र प्रवेशाच्च। "रात्सस्य" "स्कोः संयोगाद्योः" इत्यपवादद्वयानुसन्धानापेक्षप्रवृत्तिकत्वाच्च। हल्ङ्यादिलोपस्य च निरपवादतया तत्प्रवृत्तावपवादविषयपरिहारस्यानपेक्षितत्वात्। अत एव तत्र हल्पदानुपादानपक्षे पचन्नित्यादौ नलोपानुपपत्तिरिति शङ्कितं भाष्यादौ। अन्यथा हल्ङ्यादिलोपस्यापि बहिरङ्गत्वादसिद्धत्वतादवस्थ्यं स्यात्। लक्षणविशेषप्राप्तेरप्रयोजकत्वात्। नचैवं यणपेक्षयापि संयोगान्तलोपस्य कथमन्तरङ्गत्वम्। यणादेशविधानस्य संज्ञात्रयघटितत्वात्। संयोगान्तलोपशास्त्रस्य तु उक्तरीत्या गुरुत्वात्। मैवम्। यणपवादानां भूयस्त्वात्तावद्विषयत्वानुसन्धानापेक्षप्रवृत्तिकस्य यणशास्त्रस्य बहिरङ्गत्वानपायात्। निर्दिष्टपरिभाषासंस्कृतस्यैव तस्य लक्ष्यसंस्कारकत्वाच्च। तत्रत्यस्याऽव्यवधानस्य स्वप्रतियोगिकभेदवद्वर्णघटितत्वात्। संयोगसंज्ञाघटकस्य त्वज्मात्रघटितत्वात्। स्वत्वस्य चान-

नुगतत्वात् इति भगवदभिप्रायः ।

यद्वा हल्सूत्रे, "हलन्त्यम्" इति सूत्रे च लृकारस्यैव तवल्कारइतिवद्गुणभूतस्य निर्देशः । नचैवं लृकारस्य कथमित्संज्ञा अचूसंज्ञाया इदानीमप्यनिष्पत्तेः इतरेतराश्रयसाम्यात् । सत्यम् । "लृदितः" इत्यनेन तज्ज्ञापनसम्भवात् इति कैयटः ।

अथवा णलो लकारेण लकारस्य इत्संज्ञा ज्ञाप्यते तस्य लित्स्वरार्थत्वात् । नच श्रवणार्थत्वम् । हल्ङ्यादिसूत्रे णल्व्यावृत्तये द्वितीयहल्ग्रहणस्य कृतत्वात् । अन्यथा ऽपृक्तत्वाभावादेव तदनापत्तेः । नच भवितेत्यादौ डादेशनिवृत्त्यर्थं तादिति वाच्यम् । सुतिसीतिप्रत्ययैः प्रकृतेराक्षेपाद्धलन्तायाः प्रकृतेः परेषां स्वादीनां लोपविधानात् डादेशं प्रति च तासन्तस्य प्रकृतित्वाभावात् । नचैवं या सेत्यादौ सुलोपो न स्यात् । नचैकदेशविकृतन्यायेन एकदेशस्य पूर्वान्ततया ग्रहणाद्वा हलन्तायाः प्रकृतेः परत्वमस्त्येवेति वाच्यम् । यः स इत्यादावतिव्याप्तेः । लोपप्रवृत्तिकाले उभयत्रापि हलन्तत्वाभावात् । आवन्तात्परत्वमाश्रित्य लोपस्य चोभयत आश्रये ऽन्तादिवद्भावनिषेधेन दुर्वचत्वात् । नच "तदस्यां प्रहरणम्" इति निर्देशात्स निषेधो ऽनित्य इति वाच्यम् । तस्यापि हल्पदार्थानवबोधकाले तत्सामर्थ्यग्रहानुपपत्तेः । नच "लिति" इति ज्ञापकं ल्युडादौ चारितार्थत्वात् इति चेत् ।

सत्यम् । तावताऽपि ण्वुलादिलकारसाधारण्येन इत्संज्ञाज्ञानस्य जातत्वात् । तस्य चोत्तरकाले "हलन्त्यम्" इति सूत्रजन्यबोधसंवादित्वनिश्चयेन प्रामाण्यादिति भाष्याशयः ।

स्यादेतत् । हल्सञ्ज्ञातः पूर्वं कथं संयोगान्तलोपः संयोगसञ्ज्ञाया हल्सञ्ज्ञाघटितत्वात्, कथं वा हस्य लू इति समासः

सुप्सञ्ज्ञाया अनिष्पत्तेः ।

एतेन द्वन्द्वसप्तमीतत्पुरुषबहुव्रीहयो व्याख्याता इति चेत् ।

सत्यम् । साधुत्वज्ञानोपयोगिशास्त्रार्थबोधस्यापि तद्बोध्यसाधुत्वकानां पदानां स्वार्थानुभावकतायामनुपयोगात् । अन्यथा क्वाप्यर्थबोधानुपपत्तेः । प्रकृते तु हल्पदार्थज्ञानस्यापि हलन्त्यमिति वाक्यार्थबोधसामग्रीघटकत्वात्तत्रैव "आदिरन्त्येन सहेता"इत्येतद्वाक्यार्थबोधोपयोगीत्सञ्ज्ञाज्ञानापेक्षेति वैषम्यम् ।

स्यादेतत् । लस्येत्संज्ञायामपि नैतद्वाक्यार्थबोधोपपत्तिः । "न विभक्तौ तु स्माः" इत्यपवादवाक्यार्थज्ञानस्य पूर्वमपेक्षितत्वात् । "पूर्वं ह्यपवादा निविशन्ते पश्चादुत्सर्गाः" इति न्यायात् । तत्र च विभक्तिपदार्थज्ञानस्य, तत्र च सुप्तिङ्पदार्थज्ञानस्य, तत्र च "आदिरन्त्येन" इत्येतदर्थज्ञानस्य, तत्र च सञ्ज्ञाज्ञानस्यापेक्षितत्वात् तस्यच"हलन्त्यम्"इत्येतद्वाक्यार्थज्ञानाधीनत्वात्, तुशब्दार्थज्ञानस्यापि ग्रहणकशास्त्रार्थज्ञानाधीनत्वात् तस्य च उदित्यंशे इत्संज्ञाज्ञानसापेक्षत्वात्, उपदेशे ऽजनुनासिक इतीत्सञ्ज्ञाया अच्पदार्थज्ञानाधीनज्ञानत्वात् उक्तक्रमेणान्योन्याश्रयसाम्यादिति चेत् ।

मैवम् । नह्यपवादप्रवृत्तिपूर्वमुत्सर्गवाक्येन बोध एव न जन्यते प्रसक्त्यभावे निषेधानुल्लासात् । तथा च हल्त्वमुद्देश्यतावच्छेदकीकृत्य इत्संज्ञाबोधे सिद्धे सुप्तिङादिपदार्थबोधे बाधकाभावान्न विभक्ताविति वाक्यार्थज्ञानं ततो हल्त्वावच्छेदेन इत्सञ्ज्ञेति प्राथमिकबोधस्य विभक्तिस्थिततवर्गसकारमकारांशे अप्रामाण्यकल्पनं ततो विभक्तिस्थिततवर्गसकारमकारभिन्नत्वे सति हल्त्वरूपमुद्देश्यतावच्छेदकमुभयैकवाक्यतया सिध्यति । अस्तिचेदं पकारादावपीति पूर्वोत्पन्नसुबादिबुद्धेः प्रामाण्यमविरुद्धम् ।

यत्तु विभक्तिस्थतकारादावपीत्सञ्ज्ञाज्ञानं जातं तत्तात्पर्यभ्रममूलकत्वादप्रयोजकमेवेति नातिप्रसङ्गः ।

यत्तु "न संप्रसारणे"इति सूत्रे,निष्पन्नस्य न प्रतिषेधः। अनिष्पन्नस्य कथं निमित्तत्वमित्याशंक्य संप्रसारणनिमित्तकपूर्वरूपस्यैवायं निषेधः । यद्वा यणि पर एव पूर्वस्य संप्रसारणनिषेध इति पक्षद्वयमपि भाष्यकारैरुक्तं तदभ्युच्चयमात्रम् ।

वस्तुतस्तु समानाङ्गग्रहणस्य तत्रावश्यकतया सम्प्रसारणपदस्य तत्स्थानिनि लक्षणयोक्तद्वितीयपक्षस्य युक्तत्वमेवेति वक्ष्यामः ।

अन्येतु हलन्त्यसूत्रमेवावर्त्तनीयं हलिति सूत्रे ऽन्त्यमित्स्यादित्यर्थः । ततो हल्संज्ञासिद्धौ हलन्त्यमिति सूत्रेण चकारादीनाम् इत्संज्ञायाम् अजादिसंज्ञासिद्धिरित्याहुः ।

अपरे तु हलिति सूत्रेणैव शपसारिसन्तं समुदायमुद्दिश्य संज्ञा विधीयते । तत्र लकारस्यापि प्रविष्टत्वेन "हलन्त्यम्" इतीत्संज्ञायां वलादिप्रत्याहारसिद्धिः । नच रेफान्त्यसमुदायस्याज्ञातज्ञापकत्वरूपोपदेशत्वाभावादित्संज्ञानापत्तिः । अनेकसूत्रकरणसामर्थ्यादावृत्त्यादिनोभयरूपत्वे तु गौरवमिति वाच्यम् । हल्सञ्ज्ञाविधानसामर्थ्यादेव तदुपपत्तेः । आनुपूर्वीविशेषांशे उपदेशसत्त्वाच्च, स्वरूपांशे तस्य त्वयापि दुर्वचत्वात् । नच संज्ञासंज्ञिनोरेकवाक्यानुपात्तत्वादासत्त्यभावः । तात्पर्येणैकवाक्यताकल्पनात् । हलन्त्यसूत्रार्थबोधान्यथानुपपत्तेश्च तत्र ग्राहकत्वात् । अन्यथा सूत्रावृत्तेरप्यनुपपत्तेः । अत एव "तस्य लोपः" इत्यत्र तस्य ग्रहणं सर्वलोपार्थमिति सिद्धान्तः । नच हलित्यत्र व्यवहितानामनुवृत्तौ "अइउण्" इत्यादीनां चाननुवृत्तौ बीजाभाव इति वाच्यम् । "नाज्झलौ" इत्यादिपर्यालोचनया चकारान्तानामननुवृत्तिसिद्धेः । अल्संज्ञामपेक्ष्या-

ऽन्यूनानतिरिक्तविषयकत्वापत्तेश्च। तादृशसंज्ञाद्वयस्य वैयर्थ्यात्। हलन्त्यसूत्रावृत्तौ हि हलिति पदस्य तत्पदाभिन्ने सूत्रे लक्षणा तत्पदमात्रानुकरणेन लाभेऽपि तदभिन्नसूत्रत्वरूपेण बोधाभावात्। नच प्रथमोपस्थितत्वादस्यैव ग्रहणम्। "हलन्त्यम्"इति सूत्रोपस्थितिदशायां प्रथममेतदुपस्थितौ नियामकाभावात्। "हलो ऽनन्तराः संयोगः" "नाज्झलौ" "रलो व्युपधाद्धलादेः संश्च" इत्येतेषामपि हल्पदानां सत्त्वात्। हल्पदघटितसूत्रत्वेन लक्षणायाम् उक्तविसर्गादीनामेवोक्तसंज्ञापत्तेः। अइउणित्यत आरभ्यैव प्राथम्यं विवक्षिणीयमिति चेत्। तथा ऽपि तद्विषयकज्ञानकल्पनावश्यकत्वे शषसरित्यन्तसमुदायस्योद्देश्यत्वकल्पने ऽपि गौरवाभावात्। एवं "हल्"इति सूत्रे सूत्रान्तर्गतं सत् यदन्त्यमिति व्याख्याने हकाराकारावन्यत्र वर्त्तिनौ दुर्वारौ। अतस्तस्मिन्नेव सूत्रे ऽन्त्यत्वं विवक्षणीयम्। हल्सूत्रान्तर्गतत्वे सति हकारोच्चारणाव्यवहितोत्तरोच्चारणविषयत्वमुद्देश्यतावच्छेदकम्-इति प्रतिपत्तिगौरवम् सप्तमीति योगविभागकल्पनं च। नच तस्यान्यत्र क्लृप्तत्वम्। एतद्विषयकतात्पर्यस्य कल्प्यत्वानपायात्।

एतेन सुप्सुपेत्यपि व्याख्यातमित्याहुः।

यत्तु वदन्ति—एकदेशावृत्तेर्विवक्षायां हरन्त्यमित्येव सूत्रितं स्यात्, भवदुक्तार्थस्य तावतापि लाभात्। पूर्वस्यापि समीपत्वानपायात्। हल्पदस्थाने सर्वत्र हरित्यस्यैव वाच्यत्वात् इति।

तन्न।

लाघवाभावादापत्त्यसिद्धेः। अन्यथा सूत्रावृत्तिविवक्षायां हलादिरित्येव ब्रूयादित्यस्यापि दुर्वारत्वात्। हरप्रत्याहारस्य तावतैव सिद्धेः।

नचैवमजादिसंज्ञार्थं "हलन्त्यम्"इति सूत्रान्तरकल्पने गौर-

वमिति शङ्क्यम् ।

उत्तरसूत्रान्नेत्यनुवर्त्य आदिभिन्नं हल् इत्संज्ञं स्यादित्यर्थोपपत्तेः । नचैवं गौरवप्रसङ्गः । "आदिर्ञिटुडवः"इत्यत्रादिग्रहणत्यागाल्लाघवसत्त्वात् । तत्र नञ्पदाननुवृत्तेश्चोभयसंमतत्वात् । नच मध्यमानामपि हलामित्संज्ञापत्तिः । तत्तदुपाध्यवच्छिन्ने यदन्त्यं तदपेक्षस्यादित्वस्य ग्रहणे तदवच्छिन्नप्रतियोगिताकभेदस्य मध्यमे ऽप्यसत्त्वात् । द्वन्द्वस्य ततो लाभानुपपत्तेश्च । "रोरि"इतिलोपे "ढ्रलोपे"इति दीर्घेच "हारन्त्यम्"इत्यस्यापत्तौ गौरवापत्तेः । न संयोगान्तलोपेन निर्वाहः । परत्वाद् "रोरि" इत्यस्य दुर्वारत्वात् । नच "पूर्वत्रासिद्धीये नास्ति विप्रतिषेधः" इति वाच्यम् । एवमप्यन्तरङ्गतया "रोरि"इत्यस्य बलवत्त्वात् ।

एवं "रात्सस्य"इति नियमादपि संयोगान्तलोपो दुर्लभः ।

यत्तु नियमसूत्राणां निषेधरूपेण प्रवृत्तिपक्षे रात्परस्य सकारभिन्नस्य संयोगान्तस्य लोपो न स्यादिति तद्वाक्यार्थः । तत्र रेफस्य निमित्तत्वश्रवणात्सकारातिरिक्तवर्णो रेफातिरिक्त एव ग्राह्यः माठरादिन्यायादिति ।

तन्न । तत्पक्षस्य गौरवग्रस्तत्वादनभ्यर्हितत्वात् । अजर्घा इत्यादेरसिद्धेश्च । कुर्दधातोरुपधादीर्घानङ्गीकारपक्षे ऽपि यङ्लुकि लङि सिपि अचोकूरिति दीर्घस्य माधवेनोक्तत्वात् । "दश्च" इति रुत्वम् । त्वद्रीत्या संयोगान्तलोपस्यैव प्रसक्त्या "रोरि"इतिलोपाप्रवृत्त्या तद्विरोधात् ।

केचितु "हलन्त्यम्" इत्यत्र मकारोत्तरमेव लकारमश्लेषो व्याख्येय इत्याहुः ।

अन्येतु"उपदेशे इदन्त्यम्,अच्,अनुनासिक एव" सूत्रणीयम् । तृतीयसूत्रं नियमार्थम्–अचेदु इद्भवति तर्ह्यनुनासिक एवेति

तेन भूइत्यादौ नापत्तिः। नच विपरीतनियमापत्तिः। "मिदचो-ऽन्त्याद्" इत्यादिलिङ्गात्। नच नियमस्य अव्यवहितसूत्रप्राप्त-संज्ञाव्यावर्त्तनेन चरितार्थत्वात् भूइत्यादौ इत्संज्ञाया दुर्वारत्वमिति वाच्यम्। वाक्यार्थत्रयकल्पने, नियमवाक्ये निषेधत्वस्य कल्पने, विपरीतनियमादिवारणार्थं ज्ञापकान्तरकल्पनेच प्रतिपत्तिगौरवान्नेदं युक्तमित्यपरे।

योगविभागसामर्थ्यात्सूत्रद्वयप्राप्तसञ्ज्ञाव्यावृत्तेः अजनुनासिक इत्येकयोगे ऽनन्त्यस्यानुनासिकस्याच इत्सञ्ज्ञाविधानेऽन्त्यस्यानुनासिकस्यापि पूर्वसूत्रेण संज्ञेति फलितार्थस्य तुल्यत्वात्। अन्त्यांशे नियमो ऽनन्त्यांशे विधिरिति वैरूप्यस्य दुर्वचत्वात्। क्वचिदगत्या तत्सहनेऽपि तद्दोषदुष्टन्यासस्य कल्पयितुमयुक्तत्वात्। तत्सहने तूक्तरीत्या योगद्वयकल्पने ऽपि क्षत्यभावादित्याहुः।

अन्ये तु "अन्त्यम्" इत्येवावर्त्तनीयं ततो लस्येत्संज्ञायां हलन्त्यमित्येतद्वाक्यार्थबोधः। हलन्त्यमिति नियमार्थं हलू चेदिद्भवति तर्ह्यन्त्यमेवेति भ्वादौ न दोष इत्याहुः।

वस्तुतस्तु लृकारनिर्देशवादिनो भाष्यकृतो ऽयंभावः—"अच्" इति योगं विभज्य "भूवादयः" इत्यतो "वादयः" इत्यनुवर्त्तनीयम्। अभिविध्यर्थकेनाङा औकारस्याव्ययीभावे नपुंसकह्रस्वत्वे च कृते उइति रूपम्। अकार आदौ येषां ते आदयः, उकाराभिन्ना आदय इति कर्मधारयः। यणादेशः। औकारपर्यन्ता अकारप्रभृतयः अच्संज्ञा इति वाक्यार्थः। ततः पूर्वोक्तरीत्या हल्पदार्थप्रसिद्धौ हलन्त्यमित्यस्य प्रवृत्तिः ततो ऽणादिसंज्ञासिद्धिरिति न काऽप्यनुपपत्तिः।

एतेन "सनाद्यन्ता धातवः" इत्येतदुत्तरं "भूवादयश्च" इति

सूत्रणीयं लाघवादिति तृतीये वक्ष्यमाणं केषां चित्कल्पनमप्यपास्तम् ।

अत्र पाठस्योक्तानुवृत्त्यर्थत्वात् ।

एतेनैव "हलन्त्यम्" इत्यस्य प्रवृत्त्युत्तरम् "उपदेशे ऽजनुनासिकः" इति सूत्रलेखनमपि निरस्तम् । उक्तरीत्यैवाच्संज्ञासिद्धेः ।

यद्वा हल्संज्ञाया एव "आदिरन्त्येन" इत्येतत्प्रवृत्तिव्यतिरेकेण सिद्धौ यत्नान्तरं कार्यम् । हल् इति विभज्य अनु इत्यनुवर्त्तनीयम् । आङा सह अकारस्याव्ययीभावे अ इति रूपम् औकारस्य तूक्तरीत्या उ इति । ततो द्वयोर्द्वन्द्वः—अं च उ चेति । गुणे कृते नपुंसकह्रस्वत्वे च उ इत्येव रूपम् । ततो नञ्समासे अनु इति सिद्धम् । अकारादारभ्य औकारपर्यन्ताक्षराभिन्नम् अक्षरं समाहारमित्यर्थः । नञिवयुक्तन्यायाद्भेदप्रतियोगितानवच्छेदकतत्प्रतियोगिवृत्त्यक्षरत्ववतोऽक्षरस्य भेदानुयोगित्वलाभः ।

यद्वा पूर्वोक्तरीत्याच्संज्ञा प्रसाध्या । "नाज्झलौ" इति सूत्रं तु प्रयत्नभेदेन भाष्यकृता प्रत्याख्यातं सत् हल्संज्ञाविधानार्थतया व्याख्येयम् । "सरूपाणामेकशेषः" इत्यत्रैतादृशरीतेः कैपटकौस्तुभादौ प्रसिद्धत्वात् । "नाज्झलावीदूदेद् द्विवचनं प्रगृह्यम्" इति संहितापाठे नाज्झलाप् इति च्छेदः । नाच् अभिन्नं हल्संज्ञामाप्नोति हलाप् हल्संज्ञमिति यावत् । यथाश्रुतच्छेदपक्षे चरितार्थत्वान्नात्राधिक्यशङ्का । समानाधिकरणनिर्देशापेक्षया प्रतिपत्तिगौरवाभावात् ।

यद्वा नाज्झला ईदूदेदिति संहितापाठः । हला हल्शब्देन सह स्यात् । साहित्यं च वाच्यत्वसम्बन्धरूपम् । अविच्छिन्नादिसम्प्रदायमूलकव्याख्यातृवचनादेव शिष्याणां हलादिपदार्थ-

बोधः । तस्य प्रामाण्यं दुष्करीत्या शास्त्रैकमूलकत्वेन अवस्थाप्यते इति तत्त्वम् ।

न विभक्तौ तुस्माः ४।

विभक्तिस्थास्तवर्गसकारमकारा इतो न । रामान्, पचेरन् । ब्राह्मणाः, पचतः । रामम् । अद्राक्षम् । विभक्तौ किम् । अचो यत् । ऊर्णायायुस् । रुधादिभ्यःश्नम्।नच किमोऽत् इत्यादावपि निषेधापत्तिः । "प्राग्दिशो विभक्तिः" इति संज्ञायाम् एतदप्रवृत्तेः । अत्र च ज्ञापकम्–"इदमस्थमुः" इति मकारस्य इत्संज्ञापरित्राणार्थमुकारकरणम् । नचैवं तदानीमित्यत्र दानीमो मित्त्वापत्तिः । तस्य यान्तत्वात् । संयोगान्तलोपस्य इत्संज्ञां प्रत्यसिद्धतया मान्तत्वाभावात् ।

यद्वा निषेधानित्यत्वमात्रं ज्ञाप्यम् । औत्, इटोऽत् इत्यादौ तकार उच्चारणार्थः । अन्यथा तित्स्वरापत्तेः । उरौ वा यो, भक्षीय तव राधस इत्यादौ प्रत्ययस्वरेणान्तोदात्ततादर्शनाच्च । लविषीयेत्यत्र भाष्ये एवान्तोदात्तत्वोक्तेश्च ।

आदिर्ञिटुडवः ५।

उपदेशे आदिभूता एते इतः स्युः । आदिरिति सौत्रमेकवचनम् । ञि इन्धी इद्धः । "ञीतः" इति वर्त्तमाने क्तः । डुवेपृ "वेपथुः । "द्वितो ऽथुच्" । डुवप् उप्त्रिमम् । "ड्वित"इति क्त्रिः । उपदेशे किम् । ञिकारीयति । डुङ् ध्वनौ । ऋदोरप् । ङ्वं कर्तुमिच्छति ञिङ्वयिषति । तत्करोति ण्यन्तात्सन् इत्यपि प्रत्युदाहार्यम् । आदिः किम् । पटूयति । पृथ्वादिषु पटुशब्दो-

पदेशसत्त्वात् । अत्रेत्संज्ञायाम् अवयवे अचरितार्थं लिङ्गं समुदायस्य विशेषकमित्यथुच् स्यात् ।

षः प्रत्ययस्य ६।

प्रत्ययस्यादिः ष इत्संज्ञः । नर्तकी । शिल्पिनि ष्वुन् । पित्त्वात् ङीष् । प्रत्ययस्य किम् । षोडश । षप उत्वम् इत्यत्रोपदेशः । आदिः किम् । अविषः महिषः । अविमविभ्यां टिषच् ।

ननु फलाभावादत्र नेत्संज्ञा । ईकारप्रत्ययस्य टित्त्वादेव सिद्धेः । नच ङीपि अनुदात्तत्वं ङीपि तूदात्तत्वमिति पक्षे ङीषर्थं पित्त्वं स्यादिति वाच्यम् । चित्परस्य ङीपो ऽपि उदात्तनिवृत्तिस्वरेणोदात्तत्वात् इति चेन्न । विनिगमकाभावेन पक्षे टकारस्यापि श्रवणप्रसङ्गात् ।

चुटू ७।

प्रत्ययाद्यौ चुट् इतौ स्तः । वर्गद्वये द्वितीयचतुर्थानां छझठढानाम् ईय्-अन्त्-इक्-एय् इत्यादेशा वक्ष्यन्ते । गोत्रे कुञादिभ्यः च्फञ् । कौञायन्यः । जम् । ब्राह्मणाः । शण्डिकादिभ्यो ञ्यः । शाण्डिकोऽभिजनो ऽस्य शाण्डिक्यः । चरेष्टः । कुरुचरी । जनेर्डः उपसरजः । प्रज्ञादिभ्यो णः । प्राज्ञः ।

इदं चानित्यम्, चुटुषाः प्रत्ययस्येति कर्तव्ये पृथग्योगसामर्थ्यात् । तेन केशचुञ्चुरित्यादौ चस्य नेत्संज्ञा । तथा चान्तोदात्तापत्तिः । पित्करणं तु पर्यायार्थं स्यात् । "नते नासिकायाः" इति टीटच् । अवटीटः ।

यद्वा । एतेषु "लोपो व्योः" इति यकारो लुप्तनिर्दिष्ट इति

भाष्यम् । भाष्यकारवचनाद्राजदन्तादेराकृतिगणत्वाद्वा पूर्वकालस्य परानिपातः ।

लशकतद्धिते ८।

तद्धितभिन्ने प्रत्यये आदिभूता लशकवर्गा इतः स्युः । भवनम् । भवति । भूतः । प्रियंवदः । जिष्णुः । भङ्गुरः । हरये । ल्युट्–शप्–क्त–खश्–ग्स्नु–घुरच्–ङे इत्येतत्सम्बन्धिनां लादीनां यथाक्रममुक्तसंज्ञा । अतद्धिते किम् । चण्डालः । "माणिस्थादातः" इति लच् । लोमशः । "लोमादि–" इति शः । कार्णिका । "कर्णललाटाद्" इति कन् । अत्र "कितिच" इति वृद्धिः स्यात् ।

"इर उपसङ्ख्यानम्" । "इरितो वा" इत्यत्र इर् इत् यस्येति समुदायानुकरणम् । अज्झल्समुदायत्वादप्राप्तावारम्भः । समुदायस्य संज्ञायामवयवाः पारतन्त्र्यादित्सञ्ज्ञां न लभन्ते इति इदित्त्वाभावान्न नुम् । नचैवं स्वरितेत्त्वस्याप्यनापत्तिः । सामर्थ्यादवयवगतस्य स्वरितस्य समुदाये आरोपात् ।

यद्वा रेफस्य "हलन्त्यम्" इति इकारस्य "उपदेशे ऽजनुनासिकः" इतीत्सञ्ज्ञा । इरावितौ यस्येत्यवयवयोरेव इत्सञ्ज्ञकत्वेन व्याख्यानात् । नन्वेवं नुमापत्तिः । नच कुम्भीधान्यन्यायेन इकारमात्रं यत्रेत्सञ्ज्ञं तस्यैव नुमिति वाच्यम् । नन्दतीत्यादावव्याप्तेः । टुकारस्यापि तत्रेत्सञ्ज्ञत्वात् । मैवम् । तेषाम् ऋकारान्तत्वाश्रयणात् । "ऋत इद्धातोः" इति इत्त्वे रपरत्वे च कृते भिदिर् इत्यादिनिर्देशः । अनङ्गस्यापि निपातनादित्त्वम् । भिद् ऋ इत्यत्र पूर्वम् ऋकारस्येत्सञ्ज्ञा तत इत्त्वरपरत्वे । "इरितो वा" इत्यत्रापि ऋ इत् यस्यायम् इरित् निपातनादित्त्वरपरत्वे ।

यद्वा स्कन्दिरूप्रभृतीनां नकारपाठस्य अन्तेदितामेव नुमित्यत्र ज्ञापकत्वात् । नच नलोपाभावार्थो नकारोपदेशः । इदित्त्वादेव तदप्रसङ्गात् ।

अथवा "न दृशः" इति क्सप्रत्ययप्रतिषेधो ज्ञापकः । नुमि हि सति इगुपधत्वाभावादेव क्सो न स्यात् ।

यद्वा "गोः पादान्ते" इतिसूत्रादन्तग्रहणमनुवर्त्त्य अन्ते इदितामेव नुम् इति व्याख्येयम् । तेन चक्षिङो न नुम् ।

तस्य लोपः ९।

तस्य इतो लोपः स्यात् । तस्य ग्रहणं सर्वलोपार्थम् । अन्यथा अभावरूपस्य लोपस्य भावापेक्षत्वात्प्रकरणादित्सञ्ज्ञस्य लाभोपपत्तेः । तेन त्रिटुडूनामन्त्यलोपो न । नच नानर्थकेऽलोन्त्यविधिरित्येव तत्सिद्धिः । अलोन्त्यात्पूर्व इत्यत्र तत्प्रत्याख्यानात् ।

यथासंख्यमनुदेशः समानाम् १०।

समसङ्ख्यानां सम्बन्धो यथाक्रमं स्यात् । स चोद्देश्यविधेयानां यथा-"नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः"। नन्दनः। ग्राही। पचः। उद्देश्यानामेव यथा–"समूलाकृतजीवेषु हन्कृञ्ग्रहः"। अत्र विधेयस्य णमुल एकत्वेऽपि अनुवाद्ययोः धातूपपदयोरेव यथासङ्ख्यम्। "परस्मैपदानां णलतु–" इत्यादौ परस्मैपदशब्देन सर्वेषां युगपत्प्रत्यासत्तेर्न पाठक्रमेण व्यवस्था । लोके अजाविधनौ देवदत्तयज्ञदत्ताविति समासनिर्देशे क्रमनियमाभावः । द्वन्द्वे-

ऽनेकावयवात्मकसमुदाय एवैकशब्दतः प्रतिपादनादित्यारम्भः ।

ननु "विदिभिदिच्छिदेः कुरच्" इत्यादौ तच्छीलाद्यर्थत्रयेण यथासङ्ख्यं स्यात् । एवं "ख्यत्यात्" "ङसिङसोः" इत्यादावपीति चेत् ।

अत्र भाष्यम्–"स्वरितेन" इत्यपकृष्यते तेन स्वरितत्वाभावान्न यथासङ्ख्यम् । प्रतिज्ञास्वरिताः पाणिनीयाः । अत एव "कर्तृकर्मणोश्च भूकृञोः" इत्यत्र न यथासङ्ख्यम् । तेन भवतेरकर्मकत्वात्कर्तर्येवोपपदे खल् । करोतेस्तु कर्मण्यपि ।

केचित्तु प्राप्त्यर्थस्य भवतेरुपपदद्वये ऽपि स इत्याहुः । "नाडीमुष्ट्योश्च"इत्यत्र तु भवत्येव ।

स्यादेतत् । "इको यणचि"इत्यत्र यथासङ्ख्यं न स्यात् । इकारोकार–ऋकाराणां प्रत्येकमष्टादश भेदाः लृकारस्य तु द्वादशेति इकां षट्षष्टिसङ्ख्यत्वात् । यणां च सप्तत्वात् । भाव्यमानत्वे ऽपि गुणानामभेदकतया सानुनासिक्यानामपि यवलानां ग्रहणात् । नचात्रान्तरतमपरिभाषयैव निर्वाहः । स्थानेऽन्तरतमसूत्रे "किमुदाहरणम् । इको यणचि दध्यत्र । सङ्ख्यातानुदेशेनाप्येतत्सिद्धम्" इतिभाष्यविरोधात् ।

अत्राहुः–इक्शब्दबोध्या या इत्वादिजातयस्तदवच्छिन्नानां यणशब्दबोध्ययत्वादिजातिचतुष्टयावच्छिन्ना भवन्तीति सूत्रार्थः । तथाच निरूढलक्षणाऽपि नाङ्गीकार्येति लाघवम् । नच निरनुनासिकानामनुनासिकयकारादिप्रसङ्गवारणायान्तरतमपरिभाषाश्रयणे आवश्यके कृतमेतत्प्रवृत्त्येति वाच्यम् । तदंशे यथासङ्ख्यपरिभाषायाः पारविरहात् । अन्तरतमपरिभाषाप्रवृत्तावपि स्थान्यंशे परत्वाद्यथासङ्ख्यस्यैव प्रवृत्तेः । अत एव प्रत्याहारपाठे शब्दतः साम्यमस्तीति तत्र कैयटः ।

एतेन ऋकारलृकाराभ्यां प्रत्येकं तस्या एव त्रिंशत उपस्थितौ सत्यामृकारस्य लृकार लृकारस्य च रेफ आदेशः परं स्यादित्यपि निरस्तम् ।

अत एव हयवरट्सूत्रे हरयवडितिन्यासे परत्वाद्यथासङ्ख्यमेव प्रवर्त्तेत इति शब्दकौस्तुभे ऽप्युक्तम् ।

स्वरितेनाधिकारः ११।

इत्थम्भूतलक्षणे तृतीया । अधिकारो विनियोगः । स्वरितत्वं चाधिकारज्ञापनार्थम् न तु प्रयोगसमवेतम । स्वरितत्वयुक्तं शब्दस्वरूपमधिकृतं बोध्यम् । यथा "प्रत्ययः" इत्यादि उत्तरत्रोपतिष्ठते । क्वचित्पूर्वत्रापि । तदुक्तम्-'अतिङित्युभयोः शेषः' इति । अवधिविशेषे तु व्याख्यानं प्रमाणम् । आतृतीयाध्यायान्तं धात्वधिकारो न तु लादेशेभ्यः प्रागेव । सप्तमाध्यायसमाप्तिपर्यन्तमङ्गाधिकारो न तु प्रागभ्यासविकारेभ्य एवेत्यादिदर्शनात् ।

यद्वा स्वरिते सति नाधिकार इत्यर्थः । तेन पूर्वाधिकारनिवृत्तिः । तथा च "विंशतिकात्खः" इत्यत्र स्वरितत्वदर्शनाद् "द्वित्रिपूर्वाद्" इत्यस्य निवृत्तिरनुमीयते ।

नचैकः स्वरितो ऽधिकारार्थ एकस्त्वधिकारनिवृत्त्यर्थ इति सन्देहनिर्णयानुपपत्तिः । व्याख्यानात्तदुपपत्तेः ।

नचैवं व्याख्यानमेवानुवृत्त्यननुवृत्तौ नियामकमस्तु किं प्रकृतसूत्रेणेति वाच्यम् । अर्थान्तरसंग्रहार्थत्वात् ।

तथाहि-स्वरितेनाधिकारस्तेनोऽर्थो ग्राह्यः । तेन "गोस्त्रियोः" इत्यत्र स्त्रीशब्दस्य स्वरितत्वप्रतिज्ञानात् "स्त्रियाम्"

इत्यधिकारे विहितः प्रत्ययो गृह्यते तेन "गोटाङ्ग्रहणं कृन्निवृत्त्यर्थम्" इतिवार्त्तिकं गतार्थम् ।

किञ्च अधिकं कार्यमधिकारः । गौरवस्यापि ग्रहणमित्यर्थः । तेन यत्र गौणमुख्यन्यायो नेष्यते तत्र स्वरितः पाठ्यः यथा ऽपादानाधिकरणादौ। तेन "भीत्रार्थानाम्"इत्यादेर्बुद्धिकल्पितमपायमाश्रित्य प्रत्याख्यानं सङ्गच्छते। "छन्दसि"इत्यस्य प्रमाशब्दत्वेन गौणे आर्षग्रन्थरूपेऽपि छन्दसि प्रवृत्तिः । अत एवार्षत्वात्साधुत्वमिति तत्र तत्रोद्घोषः । गङ्गायां गाव इत्यादौ गङ्गाशब्दस्य नदीवृत्तित्वे ऽपि सामीप्याद्गौणमाधारत्वमिति तत्रापि सप्तमी । यदा तु गङ्गापदस्य तीरे तात्पर्यं तदा प्रकृतावेव लक्षणा विभक्तिर्मुख्यार्थैवेति विशेषः ।

अपिच अधिकः कारः कृतिरियं पूर्वोऽपि परं बाधते स्वरितत्वयोगात् । तेन पूर्वविप्रतिषेधानां सङ्ग्रहः । तद्वार्त्तिकानां च तद्विवेकार्थत्वम् तुल्यजातीयस्य च परस्य पूर्वेण बाधो नतु नित्यत्वादियुक्तस्येति नातिप्रसङ्गः ।

इति श्रीसिद्धान्तसुधानिधौ प्रथमस्याध्यायस्य
तृतीयपादे प्रथममाह्निकम् ।

अनुदात्तङित आत्मनेपदम् १२।

"भूवादयः" इत्यतो ऽनुवृत्तस्य "धातवः" इत्यस्य पञ्चम्यन्तत्वेन विपरिणामः । सादृश्यमात्रेण परिणामव्यवहारो वस्तुतो योग्यस्य शब्दान्तरस्यैव सन्निधानादिति कैयटः । आत्मनेपदेनैव धातुलकारयोराक्षेपः "इको झल्" इत्यत्र सना धातोरिवेति कौस्तुभः । ङिता धातोर्विशेषणात्तदन्तविधिः । द्वन्द्वान्ते श्रूयमाणस्य इत्पदस्य द्वाभ्यां सम्बन्धः । अनुदात्तांशे तदन्तविधेः फलाभावात् । "उपदेशे" इत्यनुवृत्तम् । तथाच अनुदात्तेत्कादुपदेशे यो ङित्तदन्ताच्च धातोर्लस्य स्थाने आत्मनेपदमेव स्यात् । एधते । स्पर्द्धते । बोभूयते । ऋतीयते । शीङस्तु व्यपदेशिवद्भावात् ङिदन्तत्वम् । विधीयते इत्यादौ त्वक्यवे ऽचरितार्थेन ङकारेण क्यङन्तं ङित्, ततो व्यपदेशिवद्भावेन ङिदन्तत्वम् । उपदेशे किम् । चुकुटिषति । "गाङ्कुटादिभ्यः" इति अतिदेशात्सनो ङित्त्वम् । धातोरिति किम् । चङङ्भ्यां मा भूत् । अदुद्रुवत् । अच्युतत् ।

एतेन चिनुतः सुनुत इत्यादि व्याख्यातम् । "सार्वधातुकमपित्" इति ङित्त्वस्यातिदेशिकत्वात् ।

ननूपदेशधातुशब्दयोरनुवृत्तिर्व्यर्था । विकरणेभ्यो नियमो बलीयान् इत्यस्य "वृद्भ्यः स्यसनोः" इत्यत्र ज्ञापयिष्यमाणत्वात् । प्रथममेवात्मनेपदनियमस्य प्रवृत्तेरिति चेत् ।

अत्राहुः—

उपसञ्जनिष्यमाणेनापि ङिता उपसञ्जातनिमित्तस्यापि परस्मैपदस्य बाधः स्यात् । विकरणव्यवधानेऽपि नियमप्रवृत्तिरित्यस्यापि ज्ञापनसम्भवात्, नियमस्य बलवत्तायाः पाक्षिकत्वाच्च ।

हरदत्तस्तु ङित इत्येव व्याचख्यौ। धात्वनुवृत्तौ प्रयोजनाभावात्। नियमस्य बलवत्त्वादेव चङादावदोषात्।

नच भाविना ङिता बाधः। परस्मैपदस्य परत्वात्।

अत एव प्रसादकृतोक्तं चङङोस्तु परस्मैपदप्रवृत्त्यनन्तरं प्रवृत्तत्वेन ङित्त्वेऽपि तङ् नेति।

केचित्तु यङीयङोर्ङकारस्य गुणवृद्धिनिषेधेन चरितार्थत्वमाशङ्क्य यङः प्रागनुदात्तमकारं श्लिष्य अनुदात्तेत्त्वादेव तङ्। न च यङन्तात् "अनुदात्तेतश्च हलादेः" इति युच्प्रसङ्गः। "जुचंक्रम्यदन्द्रम्य" इति ज्ञापकात्तदभावात्। ईयङः प्रागिकारमीकारं वाऽनुदात्तं श्लिष्य आद्ये अन्तेदित्त्वाभावान्न नुम्, द्वितीये एकाच् इत्यनुवृत्तेः "श्वीदितो निष्ठायाम्" इति नेण्निषेध इति कल्पयांचक्रुः।

ननु यङ्लुक्यतिव्याप्तिः, प्रत्ययलक्षणेन ङिदन्तत्वात्।

अत्र प्राञ्चः—"बोभूतुतेतिक्ते" इति तिजेर्यङ्लुगन्तादात्मनेपदविधानं ज्ञापकं यङ्लुगन्तात्प्रत्ययलक्षणेनात्मनेपदं नेति। अत एव "चर्करीतं च" इति अदादौ पठितस्य चकारात्पदस्मैपदमिति व्याख्यानं ज्ञापकसिद्धार्थस्फुटीकरणार्थम् इत्याहुः।

यद्वा ङित्त्वस्य प्रत्ययाप्रत्ययसाधारणतया प्रत्ययलक्षणेनात्मनेपदं नेति। अत एव न तत्प्रयुक्तात्मनेपदप्रवृत्त्यभावः। अत एव गोदितामित्यादावबादयो न। शोभना दृपदो यत्र तत् सुदृषत् इत्यत्र "सोर्मनसी इति स्वरः" "अत्वसन्तस्य" इति दीर्घश्च न भवतीति सिद्धान्तः।

अथ पास्पर्द्धीत्यत्रात्मनेपदं स्यात् स्पर्द्धेरनुदात्तत्वात्। द्विः प्रयोगो द्विर्वचनं षाष्ठम् इति सिद्धान्तात्प्रकृत्यन्तरत्वाभावात्।

मैवम्। "स्तिपा शपाऽनुबन्धेन" इति निषेधात्। अनुबन्ध-

निर्देशो हि द्वेधा विशिष्य सामान्यतश्चाऽऽद्यः–"शीङः सार्वधातुके गुणः" इत्यादौ, द्वितीयः "अनुदात्तेतः" इत्यादौ । "आङो यमहनः" इत्यादौ उपसर्गानुबन्धस्यैव निर्देशो न प्रकृत्यनुबन्धस्येति यङ्लुकि भवत्येव । उक्तनिषेधस्य प्रकृतिग्रहणे यङ्लुगन्तस्य ग्रहणमित्येतदपवादत्वात् । अत एव चेत्तितः मरीमृष्ट इत्यादौ "क्ङितिच" इति निषेधप्रवृत्तिः ।

अनुदात्तेत्त्वलक्षणं चात्मनेपदमनित्यं चक्षिङो ङित्करणात् । विचक्षणः प्रथयन्नित्यादावन्तोदात्तपाठानुरोधेन "अनुदात्तेतश्च हलादेः"इति युचो वक्तव्यत्वात् अनुदात्तेत्त्वनिर्णयात् । अत एव स्फायन्निर्मोकसन्धिप्रचलदविगलत्संमदस्वेदपूरा इति मुरारिः । स एवायं नागः सहति कलभेभ्यः परिभवमिति तु आधृषाद्वेति विकल्पितणिचः सहे रूपम् ।

इदं च प्रकरणं नियमार्थम् । लस्य तिबादयः, "लटः शतृशानचौ", "लिटः कानज्वा", "क्वसुश्च", "लृटः सद्वा" इत्यात्मनेपदपरस्मैपदानां विहितत्वात् ।

स्यादेतत् । विकरणानामवकाशो लादेशभिन्नाश्चानशादयोनियमस्य आशीर्लिङ्लिटौ,तदादेशानामार्द्धधातुकत्वात् तत्र विकरणानवकाशात् । लुक्श्लुश्नमश्च । आद्ययोर्विकरणलोपेनान्त्ये च मध्यपातित्वेन व्यवधानविरहात् । स्पर्द्धते इत्यादावुभयप्रसङ्गे परत्वान्नित्यत्वाच्च विकरणानां पूर्वमुत्पत्त्या तैर्व्यवधानान्नियमो न प्रवर्त्तेत । तस्मादेकवाक्यतया विधिरेवास्तु। तथा हि आत्मनेपदपरस्मैपदाभ्यां लिङ्गाभ्याम् इदं प्रकरणं लादेशविधावुपतिष्ठते तत्र महावाक्येन विहितेषु लादेशेषु सार्वधातुकमाश्रित्य पश्चाद्विकरण इति न दोषः ।

नन्वेवमपि स्यादीनां लावस्थायामेव विधानात्तद्व्यवधाना-

दोषतादवस्थ्यमिति चेत् ।

न । लमात्रापेक्षत्वादन्तरङ्गा लादेशाः लकारविशेषापेक्षया बहिरङ्गाः स्यादय इति लादेशानां पूर्वमेव प्रवृत्तेः । लादेशानन्तरमेव स्यादीनां प्रवृत्तिः, अन्यथा तासेः परस्य लसार्वधातुकस्यानुदात्तविधिना विकरणस्वरस्सार्वधातुकस्वरं न बाधते इत्येतज्ज्ञापनानुपपत्तेरिति तृतीये वक्ष्यमाणत्वाच्च । येननाप्राप्तिन्यायेन शबादीन्बाधित्वा, शबादिविधावनुवर्त्तनाद्वा ।

ननु संज्ञया विधानं विहितानां च संज्ञेत्यन्योन्याश्रयः । एकवाक्यतापक्षे पूर्वं लादेशविध्यभावेन विहितानुवादेनात्मनेपदपरस्मैपदसंज्ञयोर्विध्ययोगादिति चेत् ।

मैवम् । परस्मैपदानुक्रमणपरित्यागेन तत्रेतरेतराश्रयाभावात् । नचैवमनुदात्तङिद्भ्यो ऽपि तत्प्रसङ्गः । तेषामात्मनेपदसम्बन्धावगमेन परस्मैपदसम्बन्धस्य बाधनात् । नच "अनुपराभ्यां कृञः" इत्यात्मनेपदनिषेधार्थं तदनुक्रमणस्यावश्यकत्वम् । "स्वरितञितः"इत्यनन्तरं कर्तर्यनुपराभ्यां कृञो नेतिसूत्रणीयत्वात् । आत्मनेपदेषु च भाविसंज्ञाविज्ञानात् ।

अत्र भाष्यम्–"पुषादिद्युताद्यृलृदितः परस्मैपदेषु" "आत्मनेपदेष्वन्यतरस्याम्"इत्यादि ज्ञापयति "विकरणेभ्यो नियमो बलीयान्"इति कृतनियमानामसङ्करेण स्थितानामेव निमित्तत्वोपपत्तेः अतो न दोषः ।

अथ नियमात्प्रागपि सम्भवमात्रेण निमित्तत्वं स्यादिति चेत्तर्हि "अनुपसर्गाद्विभाषा" इति ज्ञापकम् ।

नन्वेतदपि लिङ्लिडर्थं स्यात्–चक्रमे, चक्राम, क्रम्यात्, क्रंसीष्ट इति चेत् ।

अत्र कैयटादयः–"वृद्भ्यः स्यसनोः"इति स्ये विकल्पविधानं

ज्ञापकम् । अन्यथा पूर्वं विकरणे प्रत्यये कृते तेन व्यवहितत्वान्नियमाप्रवृत्तौ पदद्वयं सिद्धमेवेति किं विकल्पविधिना । तस्मान्नियम एव युक्तः । भाविसंज्ञाविधाने गौरवात् ।

स्यादेतत् । अनुदात्तङित एव आत्मनेपदं भवतीति प्रत्ययनियमो ऽयम्, उतानुदात्तङित आत्मनेपदमेव, भावकर्मणोरात्मनेपदमेवेति प्रकृत्यर्थनियमः । नच पूर्वेण नियमाद् "भावकर्मणोः" इत्यस्य विध्यर्थत्वमेवेति वाच्यम् । समस्तमात्मनेपदप्रकरणम् एकं वाक्यमित्याशयात् अनुदात्तङिद्भ्यो ऽपि परस्मैपदापत्तेः । उक्तनियमेन अनुदात्तङिदन्येभ्य आत्मनेपदस्य निवृत्तावपि अनुदात्तङिद्भ्यः परस्मैपदस्य दुर्वारत्वात् । तदर्थं "शेषात्कर्तरि"इति नियमारम्भे च गौरवम् ।

किञ्च "वा क्यषः" इति परस्मैपदे विकल्पिते आत्मनेपदस्यानुदात्तङित्सु नियतत्वात्क्यत्पक्षे लकारमात्रश्रवणं स्यात् ।

न द्वितीयः । अनुदात्तङिद्भ्यस्तृजादीनामनुत्पत्तिप्रसङ्गात् । भावकर्मणोरात्मनेपदमेवेत्यर्थनियमे ऽप्येवम् ।

अत्र सिद्धान्तः—शेषात्परस्मैपदमेवेति नियमादाद्यपक्षे नातिप्रसङ्गः । नच तत्सूत्रारम्भादेव गौरवम् । प्रामाणिकत्वात् । नच कर्तरीत्युक्तेः कर्तरि परस्मैपदमेवास्तु, भावकर्मणोस्तु जागर्यते अद्यते इत्यादौ परस्मैपदं स्यादिति वाच्यम् । तत्रात्मनेपदमेवेति नियमात् । किञ्चेत्याद्यपि न । लादेशेषु कृतेषु नियमप्रवृत्तेः, आत्मनेपदस्य विकल्पेन विधानात् । शेषवचनेनैव परस्मैपदसिद्धेः ।

अथ कीदृशस्तत्र नियमः कर्तरि परस्मैपदं शेषादेवेति वा

---

१ अनुदात्त इति प्रकृतिनियमो भावकर्मणोरित्यर्थनियमइति तदनुसन्धायोभयघटितोक्तिः ।

शेषात्कर्त्तर्येवेति वा ।

नाद्यः । अशेषात्कर्तरि तद्व्यावृत्तावपि भावकर्मणोः शेषादशेषाच्च तस्य दुर्वारत्वात् ।

नान्त्यः । शेषाद्भावकर्मणोस्तद्व्यावृत्तावपि अशेषाद्भावकर्मकर्तृषु तस्य दुर्वारत्वात् ।

मैवम् । योगविभागेन नियमद्वयाश्रयणात्—शेषादेव परस्मैपदं कर्तर्येवेतिच । एवं कृत्यर्थनियमो ऽप्यदोषः । तृजादीनामनवकाशत्वात् । परस्मैपदमेवेति नियमेन तत्राप्यवकाशायोगात् । तयोरेवेति भावकर्मणोस्तव्यदादिविधेरप्यनवकाशत्वात् । चिणो ऽप्यनवकाशत्वात् । वस्तुतो भावकर्मणोः सार्वधातुकार्थत्वात् ।

नचैवमपि घञ् न स्यादिति वाच्यम् । अकर्तरीतिविहितस्यापादानादिषु सावकाशत्वे ऽपि भावकर्मणोर्विहितस्यानवकाशत्वात् । नाप्यत्रात्मनेपदस्यानियतत्वादत्तीत्यादौ प्रसङ्गः । शेषात्परस्मैपदमेवेति नियमात् । नच तेन कर्तर्येवात्मनेपदव्यावृत्तावपि शेषाद्भावकर्मणोः परस्मैपदं दुर्वारमिति वाच्यम् । तत्रात्मनेपदमेवेति नियमात् । तस्मान्नियमद्वयमपि स्थितम् ।

अत्रेदमवधेयम्—प्रकृत्यर्थनियम एव युक्तः । तथाहि—शेषात्कर्तरीत्यपहाय परस्मैपदमित्येव सूत्रणीयम् । यत्र परस्मैपदमात्मनेपदमपि प्राप्तं तत्र परस्मैपदमेव स्यात् । प्रत्ययनियमपक्षे तु "शेषाद्" इति "कर्तरि" इति च वाच्यम् । योगश्च विभजनीय इति गौरवम् । तिवादिवाक्येन सह वाक्यभेदः । परिसंख्याप्रयुक्तदोषत्रयं च नियमद्वयेऽपि समानम् । तदसहने तु लस्य तिवादय इत्यनेन सहैकवाक्यत्वादिदं प्रकरणं विधायकमेव शेषात्कर्तरीति च कर्तव्यमेव अन्योन्याश्रयपरिहारायच भाविसंज्ञा विज्ञेया ।

एवं च विकरणेषु न दोषः । लादेशोत्तरं सार्वधातुकमाश्रित्य विकरणप्रवृत्तेः । न च स्यादिषु दोषः । लमात्रापेक्षतयाऽन्तरङ्गेषु तिबादिषु कृतेषु लकारविशेषापेक्षतया बहिरङ्गाणां स्यादीनां प्रवृत्तेरिति कौस्तुभकृतः ।

भावकर्मणोः १३।

विहितस्य लस्यात्मनेपदं स्यात् । सुप्यते । क्रियते । एकवाक्यतया विधिर्भिन्नवाक्यतया नियमो वेति पूर्ववत् । सोऽपि द्विधा—प्रत्ययनियमोऽर्थनियमश्चेति । नचान्त्ये को भवतां लाभो लब्ध इत्यत्र घञो ऽसिद्धिः । सजातीयस्य परस्मैपदस्यैव व्यावृत्तेः ।

ननु भिद्यते कुशूलः स्वयमेवेत्यत्र कर्मकर्तरि परस्मैपदं प्राप्नोति । "कर्मवत्कर्मणा" इति हि शास्त्रस्य,व्यपदेशस्य वाऽतिदेशः। तथाच तेन तेन शास्त्रेण तत्तत्कार्यं कर्तव्यम् । कर्मण्यात्मनेपदमित्यस्यावकाशः शुद्धं कर्म,कर्तरि परस्मैपदमित्यस्य शुद्धः कर्ता, कर्मकर्तर्युभयप्रसङ्गे परत्वात्परस्मैपदमिति ।

मैवम् । प्राधान्यात्कार्यातिदेश एव सः । सर्वातिदेशानां कार्यार्थत्वात् ।पक्षान्तरे तु "शेषात्कर्तरि" इति सूत्रे "कर्तरि कर्मव्यतिहारे" इत्यस्मात् "कर्तरि" इत्यनुवर्त्त्य कर्तैव यः कर्ता तत्र परस्मैपदम् । व्यपदेशान्तरस्याविषय इति यावत् । तत्र तु स्वाश्रयं कर्तृत्वमातिदेशिकं तु कर्मत्वमिति न परस्मैपदम् ।

कर्तरि कर्मव्यतिहारे १४।

विनिमयविषयभूतायां क्रियायां वर्त्तमानाद्धातोः कर्तरात्मनेपदं स्यात् । व्यतिलुनीते ।

ननु क्रियाणां साध्यैकस्वभावत्वात्कथं व्यतिहार इति चेत्।

अत्राहुः—योग्यतावशादस्येयं क्रिया साध्या अस्या इदं साधनमिति निर्ज्ञातसाध्यसाधनभावयोर्व्यत्यासः क्रियाव्यतिहारः। यथा संप्रहरन्ते राजान इति। अत्रैकैव क्रिया संचारिणीव संलक्ष्यते इति। कर्तृग्रहणमुत्तरार्थम्।

न गतिहिंसार्थेभ्यः १५।

पूर्वेण प्राप्तं न स्यात्। व्यतिगच्छन्ति। व्यतिघ्नन्ति।

"प्रतिषेधे हसादीनामुपसंख्यानम्"।

व्यतिहसन्ति। आदिपदं प्रकारार्थम् तेन शब्दार्थानां ग्रहणम्। व्यतिजल्पन्ति।

"हरतेरप्रतिषेधः"।

सम्प्रहरन्ते राजानः। अर्थग्रहणसामर्थ्याच्छब्दान्तरनिरपेक्षा एव ये गतिहिंसयोर्वर्त्तन्ते तेषामेव निषेधः। हरतिस्तूपसर्गयोगादेव हिंसावृत्तिरत इदं लभ्यते इत्याहुः।

ततः संप्रहरिष्यन्तौ दृष्ट्वा कर्णधनञ्जयावित्यत्र कर्मव्यतिहारो न विवक्षित इति कैयटः। 'वहेरनिषेधः' प्रापणार्थत्वात्। आक्षेपेण गतिप्रतीतेः। संविवहन्ते गर्गाः।

इतरेतरान्योऽन्योपपदाच्च १६।

आत्मने पदं न स्यात्। "परस्परोपपदाच्चेति वक्तव्यम्" इतरेतरस्य व्यतिलुनन्ति। लौकिकव्यवहारे शब्दलाघवस्यानादरादितरेतरादिशब्दा उपसर्गाश्च कर्मव्यतिहारद्योतनाय प्रयुज्यन्ते तद्वदात्मनेपदमपि स्यादिति निषेधारम्भः। सम्पद्विनिमयेनोभौ दधतुर्भुवनद्वयम् इत्यत्र क्रियाविनिमयस्याविवक्षा।

नेर्विशः १७ ।

निपूर्वाद्विश आत्मनेपदं स्यात् । निविशते । नेः किम् । प्रविशति ।

अथ कथं न्यविशत न्यविक्षत इति । नच स्वाङ्गमव्यवधायकमिति वा समाधेयम् । अङ्गभक्तस्याटो विकरणान्तं प्रत्यवयवत्वे ऽपि धातुं प्रत्यनवयवत्वात् ।

अत्राहुः–लावस्थायामेवाडागमः । "लुङ्लङ्–"इत्यत्र द्विलकारको निर्देशः इति भाष्ये वक्ष्यमाणत्वात् । लकारविशेषापेक्षमडागमं बाधित्वा लमात्रापेक्षत्वादन्तरङ्गेषु तिबादिषु कृतेषु नियमस्य प्रवृत्तेश्च । "विकरणेभ्यो नियमो बलीयान्" इति सिद्धान्तात् । अथ तज्ज्ञापकेन विकरणव्यवधाने ऽपि नियमप्रवृत्तिरिति ज्ञाप्यते तथाऽप्यदोषः । अन्तरङ्गत्वात्तिबादिषु सत्सु शब्दान्तरप्राप्त्या ऽनित्ययोरड्विकरणयोर्मध्ये परत्वादट्प्रवृत्तेः । नच विकरणः शब्दान्तरात्प्राप्तो न तु शब्दान्तरस्येति वाच्यम् । नहि शब्दान्तरस्येति वाचनिकं किन्तु न्यायः । तथा च शब्दान्तरस्य प्राप्नुवत इव शब्दान्तरात्प्राप्नुवतो ऽप्यनित्यत्वम् । यद्व्यक्तिसम्बन्धितया पूर्वं प्राप्नोति तद्व्यक्तिसम्बन्धितया पुनः प्राप्तेस्तुल्यत्वात् । अत एव "उपसर्गपूर्वनियमे ऽड्व्यवाये उपसंख्यानम्" इति वार्त्तिकं "शदेः शितः" इति सूत्रे भगवता प्रत्याख्यातमिति दिगिति केचित् ।

केचित्तु विकरणेभ्यः पूर्वमेव परत्वादडागमे तस्य धातुभक्तत्वान्न व्यवधायकत्वम् । विकरणेभ्यो नियमस्य बलवत्त्वे ऽपि अडागमाद्बलवत्त्वाभावेनाडागमात्पूर्वं "नेर्विशः" इति बहिरङ्गस्य नियमप्रवृत्त्ययोगाच्च । नच विकरणात्पूर्वं नियमो भवतीत्य-

त्रैव तात्पर्यं नत्वडागमादपि पूर्वम्, तथा च परत्वादडागमे कृते तस्य धातुभक्तत्वेनाव्यवधायकत्वान्नियमप्रवृत्तिरित्यभिप्राय इति वाच्यम्। नियमस्य विकरणाद्बलीयस्त्वे ऽपि नित्यस्य विकरणास्यादागमात्परस्य दुर्बलत्वस्यानुक्तत्वेनाडागमात्पूर्वं प्रवृत्तेरनिवारणात्। अडागमाभावस्थले तत्परिभाषायाः सार्थक्याच्च। विकरणव्यवधानेऽपीत्यादिकमप्ययुक्तम्। विकरणस्यानित्यत्वे मानाभावात्। अन्यस्य प्राप्नुवत एवानित्यत्वमिति भाष्यकृता व्यवहारात्। शब्दान्तरस्य प्राप्नुवन्विधिरनित्य इति वचनमूलन्यायस्याप्रसिद्धेः। भाष्यकृता अटो नित्यत्वोक्तावपि विकरणानामनित्यताया अनुक्तत्वात्। कृताकृतप्रसङ्गित्वमात्रेण न्यायान्नित्यत्वमाश्रित्य भुवो वुको नित्यत्वादिन्धेः छन्दोविषयत्वाच्चाभ्यां लिटः किद्वचनानर्थक्यमिति "इन्धिभवतिभ्याञ्च" इतिसूत्रं प्रत्याचक्षाणेन भगवता तत्सूत्रावयवभवतिग्रहणज्ञापितस्यान्यस्य प्राप्नुवन्विधिरनित्य इति वचनमाश्रित्य न्याय्यमङ्विकरणयोर्नित्यत्वमाश्रित्यैव, परत्वादटः पूर्वं प्रवृत्तिमभ्युपेत्य वा नेरित्यस्य षष्ठ्यन्तत्वमाश्रित्य तद्वार्त्तिकस्य प्रत्याख्यातत्वात्। एतेन वृत्तिसीरदेवग्रन्थावप्यपास्ताविति्याहुः।

परिव्यवेभ्यः क्रियः १८।

एभ्यः क्रीणातेरात्मनेपदं स्यात्। क्रिय इत्यत्र प्रकृतिवदनुकरणमिति धातुत्वादियङ्। अकर्त्राभिप्रायार्थोऽयमारम्भः। परिक्रीणीते। विक्रीणीते। अवक्रीणीते। परस्परसाहर्यात्पर्यादय एव उपसर्गा गृह्यन्ते। नेह वे क्रीणासीति। एकदेशविकृतस्यानन्यत्वात्प्राप्तिः। नच विभक्तिविशिष्टस्य विरित्यस्यायं विकारो न तु विशब्द-

(१५) शिवस्तोत्रावली । उत्पलदेववरिचिता । श्रीक्षेमराजविरचितवृत्तिसमेता (वेदान्तः) २

(१६) मीमांसाबालप्रकाशः जैमिनीयद्वादशाऽध्यायार्थसंग्रहः श्रीभट्टनारायणात्मजभट्टशङ्करविरचितः । (मीमांसा) २

(१७) प्रकरणपञ्चिका प्रभाकरमतानुसारि-मीमांसादर्शनम् । महामहोपाध्यायश्रीशालिकनाथमिश्रविरचितम् श्रीशङ्करभट्टकृतो मीमांसासारसंग्रहश्च सम्पूर्णः (मीमांसा) ३

(१८) अद्वैतसिद्धिसिद्धान्तसारः । पण्डितप्रवरश्रीसदानन्दव्यासप्रणीतस्तत्कृतव्याख्यासमलङ्कृतः । (वेदान्तः) ३

(१९) कात्यायनश्रौतसूत्रम् । महामहोपाध्याय श्रीकर्काचार्यविरचितभाष्यसहितम् । १३

(२०) ब्रह्मसूत्रभाष्यम् । श्रीभास्कराचार्यविरचितं संपूर्णम् (वेदान्तः) ३

(२१) श्रीहर्षप्रणीतं खण्डनखण्डखाद्यम् । आनन्दपूर्णविरचितया खण्डनफक्किकाविभजनाख्यया व्याख्यया विद्यासागरीति प्रसिद्धया समेतम् । (वेदान्तः) १४

(२२) आख्यातचन्द्रिका श्रीभट्टमल्लविरचिता १

(२३) श्रीलक्ष्मीसहस्रम्—बालबोधिनीव्याख्यायाऽवतरणिकया च सहितम् । ८

(२४) ब्रह्मसूत्रवृत्तिः मरीचिका श्रीव्रजनाथभट्टकृता (वेदान्तः) २

(२५) क्रोडपत्रसंग्रहः । अत्र श्रीकालीशङ्करसिद्धान्तवागीशविरचितानि अनुमानजागदीश्याः प्रत्यक्षानुमानगादाधर्याः प्रत्यक्षानुमानमाथुर्या व्युत्पत्तिवादस्य शक्तिवादस्य मुक्तिवादस्य शब्दशक्तिप्रकाशिकायाः कुसुमाञ्जलेश्च क्रोडपत्राणि ३

(२६) ब्रह्मसूत्रम्, द्वैताद्वैतदर्शनम् । श्रीसुन्दरभट्टविरचितसिद्धान्तसेतुकाऽभिधटीकासहितश्रीदेवाचार्यप्रणीतासिद्धान्तजाह्नवीयुतम् २

(२७) षड्दर्शनसमुच्चयः । बौद्धनैयायिकसांख्यजैनवैशेषिकजैमिनीयदर्शनसंक्षेपः । मणिभद्रकृतटीकया सहितः । हरिभद्रसूरिकृतः । १

(२८) शुद्धाद्वैतमार्तण्डः प्रकाशव्याख्यासहितः प्रमेयरत्नार्णवश्च १

(२९) अनुमानचिन्तामणिव्याख्यायाः शिरोमणिकृतदीधित्या जागदीशी टीका । ११

(३०) वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः परिभाषा—संस्कारप्रकाशात्मकः । सापिण्ड्यदीपकश्च ... ११

(३१) वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः आह्निकप्रकाशः ६

(३२) स्मृतिसारोद्धारः विद्वद्वरविश्वम्भरविपाठिसंकलितः । ४

(३३) वेदान्तरत्नमञ्जूषा । श्रीभगवत्पुरुषोत्तमाचार्यकृता । २

(३४) प्रस्थानरत्नाकरः । गोस्वामिश्रीपुरुषोत्तमजीमहाराजविरचितः २

(३५) वेदान्तपारिजातसौरभं नाम ब्रह्ममीमांसाभाष्यं श्रीनिम्बार्काचार्यविरचितम् । १

(३६) योगदर्शनम् । परमहंसपरिव्राजकाचार्यनारायणतीर्थविरचित-योगसिद्धान्तचन्द्रिकासमाख्यया व्याख्यया संवलितम् । २

(३७) वेदान्तदर्शनम् । परमहंसपरिव्राजकाचार्यश्रीरामानन्दसरस्वतीस्वामिकृतब्रह्माऽमृतवर्षिणीसमाख्यव्याख्यासंवलितम् । ४

(३८) विश्वप्रकाशः । कोशः । विद्वद्वरश्रीमद्देश्वरसूरिविरचितः । २

(३९) श्रीसुबोधिनी । श्रीवल्लभाचार्यविनिर्मिता श्रीमद्भागवतव्याख्या गोस्वामीश्रीविठ्ठलनाथदीक्षितविरचितटिप्पणीसहिता । श्रीमद्भागवतदशमस्कन्धजन्मप्रकर्ण श्रीसुबोधिनीटिप्पण्योः—प्रकाशः गोस्वामि श्रीश्री पुरुषोत्तमजीमहाराज विरचित २

(४०) वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः पूजाप्रकाशः । ... ४

(४१) वेदान्तसिद्धान्तसंग्रहः । श्रुतिसिद्धान्तपरनामकः । श्रीब्रह्मचारिवनमालिमिश्रविरचितः । वेदान्तकारिकावली श्रीपुरुषोत्तमप्रसाद. शर्मकृता अध्यात्मसुधातरङ्गिण्याख्य टीकया सहिता । ३

(४२) स्वानुभवादर्शः । श्रीमत्परमहंसपरिव्राजकाचार्यनारायणाश्रमाशिष्यमाधवाश्रमविरचितः । स्वकृतटीकाविभूषितश्च । २

(४३) याज्ञवल्क्यस्मृतिः । बालम्भट्टीसमाख्यव्याख्यासमलङ्कृतमिताक्षरासहिता । व्यवहाराध्यायः ११

(४४) गादाधरी । श्रीगदाधरभट्टाचार्यचक्रवर्तिकृता । श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामण्या श्रीरघुनाथतार्किकशिरोमणिविरचितदीधित्या च गर्भिता । ४

(४५) शास्त्रदीपिका । श्रीपार्थसारथिमिश्र प्रणीता । रामकृष्णविरचितयुक्तिस्नेहप्रपुरण्याख्यव्याख्यया सहिता तर्कपाद । ५

(४६) वैयाकरणसिद्धान्तलघुमञ्जूषा महामहोपाध्याय–श्रीनागेशभट्टविरचिता । श्रीमद्दुर्वलीचौर्य-बालम्भट्टाभ्यां विरचितकुञ्जिकाकलाङ्कटीकाद्वयसंवलिता । १०

(४७) व्याकरणसिद्धान्तसुधानिधीः । पर्वतीय विश्वेश्वरसूरिविरचितः । ७

(४८) विरमित्रोदयः । लक्षणप्रकाशः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः । ७

(४९) बृहदारण्यकवार्त्तिकसार श्रीमद्विद्यारण्यस्वामिविरचितः । महेश्वरतीर्थकृतयालघुसंग्रहाख्यया टीकया समलंकृतः । ६

(५०) वीरमित्रोदयः । राजनीतिप्रकाशः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः । ५

(५१) पूर्वमीमांसा अधिकरणकौमुदी । श्रीमन्महामहोपाध्याय पं० रामकृष्णभट्टाचार्यवीरचिता परिशिष्टाधिकरणनिरूपणपूर्वकं टिप्पण्या परिष्कृत । १

(५२) प्रसस्तपादभाष्यटीकासंग्रहः । तत्र कणादरहस्यम् । श्रीशंकरमिश्रविरचितम १

(५३) क्रमदीपिका । श्रीमन्महामहोपाध्याय काश्मीरिककेशवभट्टविरचिता । विद्याविनोदश्रीगोविन्दभट्टाचार्यकृतविवरणोपेत २

(५४) वीरमित्रोदयः । तीर्थप्रकाशः । महामहोपाध्याय श्रीमित्रमिश्रविरचितः । ६

(५५) सांख्यसंग्रहः । तत्र सांख्यतत्त्वविवेचनम् श्रीविज्ञानभिक्षु (क्षेमेन्द्र) विरचितम् । सांख्यतत्त्वयाथार्थ्यदीपनम् भावागणेशविरचितम् । समाससूत्रव्याख्या सर्वोपकारिणी च । १

(५६) न्यायपरिशुद्धिः । श्रीमद्वेङ्कटनाथ श्रीवेदान्ताचार्यप्रसादिता । श्रीनिवासाचार्यविरचित न्यायसारसमाख्यया टीकया युता । २

पत्त्रादिप्रेषणस्थानम्

हरिदासगुप्तः,
चौखम्बा बनारस सिटी

PLEASE DO NOT REMOVE
CARDS OR SLIPS FROM THIS POCKET

UNIVERSITY OF TORONTO LIBRARY

PK
541
V57
1914
fasc.7

Visvesvata Suri
(Vyakaranasiddhantasudhanidhih)

UTL AT DOWNSVIEW
D RANGE BAY SHLF POS ITEM C
39 16 02 07 08 018 2